॥ श्रीविनय-भक्ति-सुन्दर-चरणग्रन्थमालायाः सप्तमं पुष्पम् ॥

श्रीविनय

॥ ॐ ऐं नमः ॥

॥ श्री शान्तिनाथाय नमः ॥

॥ प्रशान्तपीयूषपाथोधितपागच्छाधिपतिश्रीमद्विजयभद्रसूरीश्वरपादपद्मेभ्यो नमः ॥

॥ श्रीचित्रसम्भूतचरित्रम् ॥

सं-सच्चारित्रचूडामणि-गीतार्थाग्रणि-तपोमूर्ति-जैनाचार्य श्रीमद्विजयभद्रसूरीश्वरशिष्य-पंन्यासप्रवरश्रीमत्सुन्दरविजयगणि-वर्यशिष्य-प्रखरवक्ता पंन्यासश्रीचरणविजयगणिशिष्य-विद्वद्रत्न-तपस्विमुनिवर्यश्रीमान् हर्षविजयः

:: प्रकाशक ::

श्रीविनय-भक्ति-सुन्दर-चरण-ग्रन्थमालाकार्यवाहकः-

शा 'रकजी' इति नामधेयस्यात्मजः कचलचन्द्रः, बेणप.

वीर सं. २४६५] मूल्य सप्त आणकाः [विक्रम सं. १९९५

सुन्दर

॥ श्री जिनाय नमः ॥

॥ श्रीचित्रसम्भूतचरित्रम् ॥

अस्ति पुरं साकेतं, सङ्केतनिकेतनं शुभश्रीणाम् ॥ तत्र मुनिचन्द्रोऽभू-न्नृपश्चन्द्रावतंससुतः ॥ १ ॥ स च सागरचन्द्रगुरोः, पार्श्वे प्रव्रज्य भवविरक्तमनाः ॥ देशान्तरे विहर्तुं, गुरुणा सममन्यदाचालीत् ॥ २ ॥ भिक्षार्थमथ क्वापि, ग्रामे गतवति महामुनौ तस्मिन् ॥ सार्थेन समं चेलु-र्गुरवः स तु सार्थवियुतोऽभूत् ॥ ३ ॥ तमटन्तमटव्यन्तः, क्षुत्तृष्णाबाधितं तृतीयदिने ॥ प्रतिचेरुर्बान्धव इव, चत्वारो वल्लवाश्चतुराः ॥ ४ ॥ प्रत्युपकर्तुमिवोचे, तेभ्यो वाचंयमोपि जिनधर्मम् ॥ तं श्रुत्वा सम्बुद्धाः, प्रवव्रजुस्तेपि भवभीताः ॥ ५ ॥ तेषु च धर्मजुगुप्सा-मुभौ व्यधत्तां व्रतप्रभावाच्च ॥ दिवि देवत्वं प्राप्तौ. ततश्च्युतौ चायुषि क्षीणे ॥ ६ ॥ दशपुरनगरे शाण्डिल्य-विप्रदास्याः सुतौ युगलजातौ ॥ जातौ तौ जयवत्याः, प्राकृतनिन्दाविपाकवशात् ॥ ७ ॥ तौ सम्प्राप्तौ तारुण्य-मन्यदा क्षेत्ररक्षणाय गतौ ॥ सुषुपतुरधो वटतरो-र्निरगात्तत्कोटराच्च फणी ॥ ८ ॥ तेन च दष्टे दुष्टे-नैकस्मिंस्तं गवेषयन् भुजगम् ॥ अपरोऽप्यदंशि तेनैव, भोगिना पूर्वरिपुणेव ॥ ९ ॥ तौ चाप्राप्तचिकित्सौ, विपद्य कालिञ्जराचलोपान्ते ॥ हरिणीकुक्षिप्रभवौ, सञ्जातौ

---

१ स्थानम् । २ सार्थरहितः । ३ भ्रमन्तम् । ४ गोपाः । ५ मुनिः ६ बिलात् । ७ सर्पः । ८ भुजगेन ।

युग्मजौ हरिणौ ॥ १० ॥ स्नेहात् सह विहरन्तौ, मुक्तैकशरेण मृगयुणा तौ च ॥ व्यापादितौ वराकौ, शिखाशनिना घनेनेव ॥ ११ ॥ अथ मृतगङ्गातटिनी—तटस्थहंसीसुतावभूतां तौ ॥ बाल्यादपि भ्रमन्तौ, सममेव स्नेहानुरागेण ॥ १२ ॥ जालेन तौ निबध्या—न्यदाऽवधीज्जालिको गलं भङ्क्त्वा ॥ विषवल्लेरिव दारुण—महो! फलं धर्मनिन्दायाः ॥ १३ ॥ अथ तौ वाणारस्यां, प्रभूतवित्तस्य भूतदत्तस्य ॥ तनयावुभावभूतां, श्वपचपतेश्चित्र—सम्भूतौ ॥ १४ ॥ वाणारस्यां च तदा, बभूव शङ्खाभिधो धराधिपतिः ॥ तस्य च दुर्मतिसचिवः, सचिवोऽभून्नमुचिरिति नाम्ना ॥ १५ ॥ अपराधे स च महति, प्रच्छन्नवधाय भूतदत्ताय ॥ दत्तोऽन्यदा नृपतिना, तं चेत्यूचे श्वपचनाथः ॥ १६ ॥ त्वां जीवयामि यदि मे, पुत्रौ पाठयसि भूमिगृहस्थः ॥ नमुचिरपि प्रतिपेदे, तदपि वचो जीवितव्यकृते ॥ १७ ॥ अध्यापयच्च सततं, कला विचित्राः स चित्रसम्भूतौ ॥ मातङ्गपतेः पत्नी—मनुरक्तामरमयच्च कुधीः ॥ १८ ॥ तच्चावबुद्ध्य रुष्टे, श्वपचपतौ हन्तुमुद्यते नमुचिम् ॥ त्वरितमनाशयतामुप—कारित्वाच्चित्रसम्भूतौ ॥ १९ ॥ निर्गत्य ततो नमुचि—र्द्रुतं ययौ हास्तिनापुरे नगरे ॥ तत्र च सनत्कुमार—चक्री तं धीसखं चक्रे ॥ २० ॥

इतश्च रूपमनिन्द्यं, लावण्यमद्भुतं यौवनं च तौ नव्यम् ॥ प्राप्तौ श्वपचसुतौ स्मर—मधुसमयाविव युतौ बभतुः ॥ २१ ॥ वीणा-वेणुकलक्वण—सम्बन्धसुबन्धुरं च तौ गीतम् ॥ गायन्तौ नृत्यन्तौ, जगतोऽपि मनो व्यपाहरताम् ॥ २२ ॥ अन्येद्युः पुरि तस्यां, मधूत्सवः प्रववृते महः प्रवरः ॥ तत्राविगीतगीता, विनिर्ययुः पौरचर्चर्यः ॥ २३ ॥ निरगाच्च चर्चरी तत्र, चित्र-सम्भूतयोरपि प्रवरा ॥ तत्र च जगतुर्गीतं, किन्नरमदहारि तौ स्फीतम् ॥ २४ ॥ आकर्ण्य कर्णमधुरं, तद्गीतं विश्वकार्मणममन्त्रम् ॥ त्यक्तान्यचर्चरीकाः,

---

१ व्याधेन । २ अशनि विद्युत् । ३ तटिनी नदी । ४ दुर्मतिसहायकः । ५ चाण्डालपतिः । ६ चाण्डालपतेः । ७ सम्मिश्रणम् । ८ गायकजनयूथः ।

पौराः पौर्यश्च तत्र ययुः ॥ २५ ॥ सर्वस्मिन्नपि लोके, तद्गीतगुणेन मृगवदाकृष्टे ॥ मातारोन्ये भूपं, व्यजिज्ञपन्नित्यमर्षवशात् ॥ २६ ॥
मातङ्गाभ्यां स्वामिन् !, गीतेनाकृष्य पौरलोकोयम् ॥ सकलोपि कृतो मलिन-स्तत इत्यलपन्नृपः कोपात् ॥२७॥ पुर्यां प्रवेष्टुमनयो-
र्नो देयं वेश्मनीव कुर्कुरयोः ॥ तत आरभ्य मूकाविव, तौ दूरमतिष्ठतां पुर्याः ॥ २८ ॥ तस्यां च पुरि प्रवरे, प्रवृत्तवति कौमुदीमहेऽ-
न्येद्युः ॥ उल्लङ्घ्य नृपतिवचनं, प्राविशतामजितकरणौ तौ ॥ २९ ॥ विहितावगुण्ठनौ तौ, छन्नमटन्तौ महं च पश्यन्तौ ॥ क्रोष्टुरवैः
क्रोष्टार-विव गानोत्कौ प्रजागीतैः ॥ ३० ॥ अवगणितभूपभीती, अगायतामतिमनोहरं गीतम् ॥ तच्च निशम्य जनास्तौ, परिवव्रुर्म-
क्षिका मधुवत् ॥ ३१ ॥ [युग्मम्] कावेतानिति लोकै-र्ज्ञातुं कृष्टावगुण्ठनावथ तौ ॥ उपलक्षितौ नृपाज्ञा-विलोपकत्वाद्भृशं निहतौ
॥ ३२ ॥ नश्यन्तौ पश्यन्तौ, दीनं भयविह्वलौ स्खलत्पादौ ॥ लोकैश्च हन्यमानौ, कथमपि तौ निर्गतौ पुर्याः ॥ ३३ ॥ गम्भीरोद्यानं
च प्राप्तौ, ताविति मिथो व्यचिन्तयताम् ॥ धिग् नौ कुलदोषहतान्, रूपकलाकौशलादिगुणान् ॥ ३४ ॥ धातव इव क्षयरुजा, दोषे-
णानेन दूषिता हि गुणाः ॥ जाता विपत्तये नौ, पनय इव भेदिता द्विषता ॥ ३५ ॥ व्यसनैरिव नौ व्यसनं, जज्ञे कुलदोषदूषितैर्हि
गुणैः ॥ स च सहचारी वपुष-स्तत्त्याज्यं रज इवेदमपि ॥ ३६ ॥ ध्यात्वेति मर्तुकामौ, यान्तौ प्रति दक्षिणामुभावपि तौ ॥ दूरं गतौ
महीधर-मपश्यतामेकमतितुङ्गम् ॥ ३७ ॥ तं चारोहन्तौ तौ, भृगुपातचिकीर्षया श्रमणमेकम् ॥ ध्यानस्थममानगुणं, प्रेक्ष्य प्रोचैर्मुदम
धत्ताम् ॥ ३८ ॥ छायातरुमिव पथिकौ, तं प्राप्यापगतसकलसन्तापौ ॥ तावनमतां वमन्तौ, प्राग् दुःखमिवाश्रुजलदम्भात् ॥ ३९ ॥
ध्यानं समाप्य मुनिना, कुत आयातौ युवामितक्ति पृष्टौ ॥ प्राकाशयतां स्वाशय-मुक्त्वा निजवृत्तमखिलं तौ ॥ ४० ॥ तत इत्यूचे

१ कोपवशात् । २ अजितेन्द्रियौ । ३ वस्त्रेणाच्छादितमुखौ । ४ शत्रुणा । ५ दुःखम् । ६ पर्वतम् ।

श्रमणो, विलीयते देह एव [1]भृगुपातात् ॥ न तु पातकं ततोऽसौ, न युज्यते दक्षयोर्युवयोः ॥ ४१ ॥ दुःखानां बीजमघं, तपसैव क्षीयते न मरणेन ॥ तदिदं हेयं देहं, सफलीक्रियतां तपश्चरणैः ॥ ४२ ॥ ग्लानाविव वैद्यवच–स्तत्साधुवचः प्रपद्य तौ सद्यः ॥ प्राव्रजतां तत्पार्श्वे, क्रमादभूतां च गीतार्थौ ॥ ४३ ॥ षष्ठाष्टमादितपसा, कृशयन्तौ विग्रहं समं पापैः ॥ मूर्तौ तपःशमाविव, सममेव विजहतुर्भुवि तौ ॥ ४४ ॥ विहरन्तौ तौ जग्मतु–रन्येद्युर्हस्तिनापुरे नगरे ॥ बहिरुद्यानस्थौ तत्र, चेरतुर्दुश्चरं च तपः ॥४५॥ सम्भूतमुनिर्नगरे, मासक्षपणस्य पारणेऽन्येद्युः ॥ भिक्षार्थमटन् ददृशे, दुरात्मना नमुचिना सचिवेन ॥ ४६ ॥ मातङ्गसुतः सोयं, मम वृत्तं वक्ष्यतीति साशङ्कः ॥ निष्काश्यतां पुरादय–मित्यूचे निजभटान्नमुचिः ॥ ४७ ॥ यमदूतैरिव चण्डै–स्तैर्लकुटादिप्रहारदानपरैः ॥ विधुरीकृतोथ साधु–र्द्रुतं न्यवर्तत ततः स्थानात् ॥ ४८ ॥ निर्गच्छन्नपि स मुनि–र्नमुचिभटैर्न मुमुचे यदाऽर्पदयैः ॥ शान्तोपि चुकोप तदा, स्यादुष्णं जलमपि ह्यनलात् ॥ ४९ ॥ तद्वदनान्निरगादथ, धूमस्तोमः समन्ततः प्रसरन् ॥ तदनु च तेजोलेश्या, ज्वालापटलैर्नभःस्पृशती ॥ ५० ॥ तद्वीक्ष्य सभयकौतुक–मेयुः पौरा मुनिं प्रसादयितुम् ॥ आयासीत्पुरनाथः, सनत्कुमारश्च चक्रिवरः ॥ ५१ ॥ नत्वा चैवमवोचत् , भगवन्नेतन्न युज्यते भवतः ॥ दग्धः कृशानुनापि हि, नागुरुरुद्गिरति दुर्गन्धम् ॥ ५२ ॥ क्रियतामस्मासु कृपा, संह्रियतामाशु कोपफलमेतत् ॥ व्यभिचरति सतां कोपः, फले खलानामिव स्नेहः ॥ ५३ ॥ उक्तं च—"न भवति भवति च न चिरं, भवति चिरं चेत् फले विसंवदति ॥ कोपः सत्पुरुषाणां, तुल्यः स्नेहेन नीचानाम् ॥ ५४ ॥" तन्मुञ्च मुञ्च कोपं, नीचजनोचितमनर्चितं मुनिभिः ॥ इत्युक्तोपि न यावत् , प्रससाद स साधुरतिकुपितः ॥ ५५ ॥ तावत्तत्रायातः, चित्रस्तं व्यतिकरं जनात्

---

१ झम्पापातात् । २ पापम् । ३ साम्यम् । ४ शरीरम् । ५ विह्वलीकृतः । ६ निर्दयैः । ७ अनलेन । ८ निन्दितम् ।

श्रुत्वा ॥ इत्यूचे भ्रातस्त्यज, रोषमिमं चरणवनदहनम् ॥ ५६ ॥ देशोनपूर्वकोट्या, यदर्जितं भवति विमलचारित्रम् ॥ तदपि हि कषायकलुषो, हरयति यतिर्मुहूर्तेन ॥ ५७ ॥ सुलभा हि बालसञ्ज्ञा–दाक्रोशाघातमरणधर्मभ्रंशाः ॥ एषु च यथोत्तरस्या–भावे मनुते मुनिर्लाभम् ॥ ५८ ॥ अपकृतिकारिषु कोपः, क्रियते चेत्कोप एव स क्रियताम् ॥ यो हरति धर्मवित्तं, दत्ते चानन्तदुःखभरम् ॥ ५९ ॥ इत्यादिभिश्च वाक्यैः, श्रुतानुगामिभिरशामि तत्कोपः ॥ पाथोधरपाथोभि–र्गिरिदावानल इव प्रबलः ॥ ६० ॥ तं चोपशान्तमनसं, प्रणम्य लोका ययुर्निजं स्थानम् ॥ तौ च श्रमणौ जग्मतु–रुद्यानं दध्यतुश्चैवम् ॥ ६१ ॥ आहारार्थं प्रतिगृह–मटद्भिरासाद्यते व्यसनमुच्चैः ॥ यात्रं चैतद्धत्वर–माहारेणापि कृतपोषम् ॥ ६२ ॥ तत्कृतसंलेखनयो–राहारैरावयोः कृतमिदानीम् ॥ इति तौ चतुर्विधाहा–रमनशनं चक्रतुः कृतिनौ ॥ ६३ ॥ कः पर्यभून्मयि नृपे, सति यतिमिति पृच्छतो जनाश्च राज्ञः ॥ केनाप्यूचे नमुचि–स्तमथ नृपोऽवन्धयत्कुपितः ॥ ६४ ॥ पुनरप्येवं माऽन्यो, मान्यानवमानयत्त्विति महीमान् ॥ पुरमध्येनानैषी–दुपमुनि तं दस्युमिव बद्धम् ॥ ६५ ॥ तौ चावन्दत भूपो–ऽङ्कुरयन्निव मेदिनीं मुकुटकिरणैः ॥ तं चानन्दयतां चारु–धर्मलाभाशिषा श्रमणौ ॥ ६६ ॥ लभतामपराधी वः, स्वकर्मफलमयमिति ब्रुवन्नृपतिः ॥ श्रमिनोरदर्शयदथो–पस्थितमरणं नमुचिसचिवम् ॥ ६७ ॥ मोक्तव्य एव राज–न्नयमित्युदितस्ततो नृपस्ताभ्याम् ॥ निर्वास्य पुरादमुच–द्गुरुवचनाद्वध्यमपि तं द्राक् ॥ ६८ ॥ तौ नन्तुमथायासी–त्स्त्रीरत्नं चक्रिणः सुनन्दाख्या ॥ देवीभिरिवेन्द्राणी, वृता सपत्नीभिरखिलाभिः ॥ ६९ ॥ तस्याश्च प्रणतायाः, वेणिलतास्पर्शमनुभवन् सद्यः ॥ सम्भूतोभूद्रक्तो–ऽनङ्गस्यापि प्रबलताहो ? ॥ ७० ॥ दध्यौ चैवं यस्या, वेणिस्पर्शोपि सृजति सुख-

---

१ चरणं चारित्रम् । २ मेघजलैः । ३ पृष्टवान् । ४ चौरम् । ५ मुन्योः ।

मतुलम् ॥ तस्या [1]नलिनास्यायाः, कायस्पर्शस्य का वार्ता ? ॥ ७१ ॥ अन्तःपुरमन्तःपुरयुक्ते, राजनि गतेथ तौ नत्वा ॥ सम्भूतमुनिर्विदधे, निदानमिति कामरागान्धः ॥ ७२ ॥ अतिदुष्करस्य यदि मे, तपसः स्यात्फलममुष्य किमपि तदा ॥ स्त्रीरत्नस्य स्वामी, भूयासं भाविनि भवेऽहम् ॥ ७३ ॥ तच्च श्रुत्वा चित्रो, दध्यौ मोहस्य दुर्जयत्वमहो ! ॥ विदितागमोपि निपतति, यदयं संसारवारिनिधौ ॥ ७४ ॥ तद्बोधयाम्यमुमिति, प्रोचे चित्रः करोषि किं ? भ्रातः ! ॥ तपसोऽमुष्मात्किमिदं, कामयसे तृणमिव द्युमणेः ? ॥ ७५ ॥ क्षणिकाक्षणिकान् काङ्क्षति, भोगानपहाय निर्वृतिसुखं यः ॥ स हि काचशकलमुररी-करोति सुररत्नमपहाय ! ॥ ७६ ॥ तद्दुःखनिदानमिदं, मुञ्च निदानं विमुह्यसि कृतिन् ! किम् ? ॥ इत्युक्तोपि स मुमुचे, न निदानं धिग् विषयतृष्णाम् ॥ ७७ ॥ तावथ पूर्णायुष्कौ, सौधर्मे निर्जरावजायेताम् ॥ चित्रस्ततश्च्युतोभू-दिभ्यसुतः पुरिमतालपुरे ॥ ७८ ॥ सम्भूतोपि च्युत्वा, काम्पील्यपुरे महर्द्धिभररुचिरे ॥ चुलनीकुक्षिप्रभवो, ब्रह्मनृपस्याभवत्तनयः ॥ ७९ ॥ तस्य चतुर्दशसुस्वप्न-सूचितागामिसम्पदो मुदितः ॥ विदधे सोत्सवमभिधां, ब्रह्मनृपो ब्रह्मदत्त इति ॥ ८० ॥ ववृधे सोथ कुमारः, सितपक्षशशीव शुभकलाशाली ॥ जगदानन्दं जनयन्, वचोमृतेनातिमधुरेण ॥ ८१ ॥ अभवन् वयस्यभूपा-श्चत्वारो ब्रह्मणोथ तेष्वाद्यः ॥ कटकः काशीशोऽन्यः, कणेरुदत्तो गजपुरेशः ॥ ८२ ॥ दीर्घश्च कोशलेश-श्चम्पानाथश्च पुष्पचूलनृपः ॥ सामान्यमिव व्यक्तिषु, तेषु स्नेहोभवद्व्यापी ॥८३॥ पञ्चापि ब्रह्माद्या-स्तेन्योन्यं विरहमक्षमाः सोढुम् ॥ एकैकपुरे न्यवसन्, प्रतिवर्षं संयुताः क्रमशः ॥ ८४ ॥ काम्पील्यपुरेऽन्येद्युः, सममायातेषु तेषु परिपाट्या ॥ ब्रह्मनृपस्य कदाचि-च्छिरोव्यथा दुस्सहा जज्ञे ॥ ८५ ॥ जातद्वादशवर्षं, न्यस्याङ्के ब्रह्मदत्तमथ

१ कमलमुख्याः । २ संसारसमुद्रे । ३ काचखण्डम् । ४ देवी

सुहृदाम् ॥ सोचे कारयितव्यं, राज्यमिदमनेन युष्माभिः ॥ ८६ ॥ इत्युक्त्वा राज्ञि मृते, कृत्वा तत्प्रेतकर्म तत्सुहृदः ॥ दध्युर्मित्रस्य
सुतः, शैशवमवगाहते यावत् ॥ ८७ ॥ तावद्राज्यमिदं रक्षणीयमारक्षकैरिवास्माभिः ॥ इति दीर्घं रक्षार्थं, मुक्त्वाऽन्ये स्वस्वनगरमगुः
॥ ८८ ॥ दीर्घोऽथ राज्यमखिलं, बुभुजेऽरक्षकमिवौदनं काकः ॥ मार्जारो दुग्धमिवा-न्वैषीत्कोशं च चिरगूढम् ॥८९॥ मध्ये [1]शुद्धा-
न्तमगा-दनर्गलः[2] पूर्वपरिचयादनिशम् ॥ रहसि च चुलनीदेवी—मवार्चयन्नर्मनिपुणगिरा ॥ ९० ॥ सोथावमत्य लोकं, ब्रह्मनृपति-
सौहृदं कुलाचारम् ॥ अरमयदनिशं चुलनी-महो ! अजय्यत्वमक्षाणाम् ॥ ९१ ॥ महिला पटमिव मुमुचे, चुलन्यपि प्रेम [3]रमण-
विषयं द्राक् ॥ तौ च सुखं भुञ्जानौ, नाज्ञासिष्टां दिनान् व्रजतः ॥९२॥ तच्च तयोर्दुश्चरितं, ब्रह्मनृपस्य द्वितीयमिव हृदयम् ॥ ज्ञात्वा
सचिवो धनुरिति, दध्यौ सद्बुद्धिजलजलधिः ॥ ९३ ॥ कुरुतामकार्यमेत-च्चुलनी जातिस्वभावचपलमतिः ॥ न्यासेऽर्पितमपि सकलं,
दीर्घो विद्रवति तदयुक्तम् ॥ ९४ ॥ तदसौ किमपि विदध्या-न्नृपभुवोपि व्यलीकमतिदुष्टः ॥ नीचो हि पोषकस्या-प्यात्मीयः
स्यात् भुजग इव ॥ ९५ ॥ ध्यात्वेति ज्ञापयितुं, तत्सकलं सेवितुं कुमारं तम् ॥ वरधनुसञ्ज्ञं निजसुत—मादिशदतिनिपुणमतिवि-
भवम् ॥ ९६ ॥ तेनाथ तयोश्चरिते, निवेदिते ब्रह्मसूनुस्तदसहिष्णुः ॥ अन्तःपुरान्तरगम-द्बद्ध्वा द्विककोकिले कुपितः ॥ ९७ ॥
वध्याविमौ यथा वर्ण-सङ्करादीदृशः परोपि तथा ॥ हन्तव्यो मे निश्चित-मित्युच्चैस्तत्र चावादीत् ॥ ९८ ॥ काकोहं त्वं च पिकी-
त्यावां खलु हन्तुमिच्छति सुतस्ते ॥ तत इति दीर्घेणोक्ते, देव्यूचे शिशुगिरा का भीः ? ॥ ९९ ॥ भद्रकरेणुमृगेभौ, नीत्वा तत्रा-
न्यदा तथैव पुनः ॥ नृपभूः प्रोचे तच्च, श्रुत्वा दीर्घोवदच्चुलनीम् ॥ १०० ॥ शृणु सुभगे सुतवाणीं, साभिप्रायां हलाहलप्रायाम् ॥

१ अन्तःपुरम् । २ प्रतिबन्धकशून्यः । ३ पतिविषयम् । ४ द्विकः काकः । ५ विषमदशाम् ।

देव्यवदङ्कवतु तथा–प्यनेन किं जायते शिशुना ? ॥ १०१ ॥ हंस्या सममन्येद्यु—र्बकमादायावरोधमायातः ॥ नृपभूरुवाच नैवं,
कस्याप्यनर्थं सहिष्येऽहम् ॥ १०२ ॥ तत इत्यवदद्दीर्घः, शृणु देवि ! शिशोः सुतस्यः वचनमिदम् ॥ अनुमापयति मनःस्थं, कोपं
यद्धूम इव वह्निम् ॥ १०३ ॥ वृद्धिं गतो हि भावी, सुखविघ्नायावयोरसौ नियतम् ॥ तदयमुदयन्निवामय, उच्छेद्यः शिशुरपि दुरा-
त्मा ! ॥ १०४ ॥ देव्यूचे राज्यधरं, हन्मि कथं तनयमौरसं स्वामिन् ! ॥ पशवोपि प्राणानिव, निजान्यऽपत्यानि रक्षन्ति ॥ १०५ ॥
भूयोप्यूचे दीर्घो, रिपुमेवावेहि सुतममुं सुतनो ! ॥ तत्किं मुह्यसि मयि सति, बहवस्तव भाविनस्तनयाः ॥ १०६ ॥ तदथ प्रतिप-
द्योचे, चुलनी स्मरागदुस्सुतमोहा ॥ केनोपायेनास्मि–न्निहते वचनीयता न स्यात् ॥ १०७ ॥ दीर्घोऽब्रवीत्कुमारो, विवाह्यतां तस्य
वासगृहदम्भात् ॥ गूढप्रवेशनिर्गम–मेकं जतुगृहं कार्यम् ॥ १०८ ॥ तत्र च सवधूकेऽस्मिन्, सुप्ते रात्रौ हुताशनो ज्वाल्यः ॥
इति तौ विमृश्य जतुगृहं—मारम्भयतामसारमती ॥ १०९ ॥ वृत्वा ब्रह्मसुतार्थे, पुष्पवतीं पुष्पचूलनृपतिसुताम् ॥ सामग्रीं च
समग्रां, विवाहसत्कामकारयताम् ॥ ११० ॥ जतुगृहरचनादथ धनु–सचिवो दुष्टं तयोर्विदन् भावम् ॥ ब्रह्मसुतो हितमिच्छु–र्गत्वा-
ऽवदद्दीर्घनृपमेवम् ॥ १११ ॥ अस्ति सुतो मे वरधनु–नामा युष्मन्निदेशकरणचणः ॥ तदहं जरी चिकीर्षे, परलोकहितं क्वचिद्गत्वा
॥ ११२ ॥ कुर्यात्किमप्यनर्थं, गतः परत्रायमिति धृताशङ्कः ॥ दीर्घः कृतावहित्थ—स्तमित्यवोचत्ततो दम्भात् ॥ ११३ ॥ त्वाम-
न्तरा हि राज्यं, न भाति नभ इव विना निशानाथम् ॥ तदलं परत्र गमनैः, कुरु धर्ममिहैव दानाद्यम् ॥ ११४ ॥ गङ्गातटेऽथ कृत्वा,
सद्बुद्धिः सत्त्रमण्डपं मन्त्री ॥ दीनादीनां दानं, ददौ यथाकाममन्नादेः ॥ ११५ ॥ प्रत्ययितनरैर्दानो–पकारमानैर्वशीकृतैः सचिवः ॥

१ अन्तःपुरम् । २ स्वोदरजातम् । ३ निन्दा । ४ वह्निः । ५ लाक्षागृहम् । ६ वृद्धः । ७ कृतं आकारगोपनं येन सः । ८ चन्द्रम् । ९ दानशालाम् ।

द्विक्रोशां च सुरङ्गा—मचीखनज्जतुगृहं यावत् ॥ ११६ ॥ वार्त्तां तां च छन्नं, न्यवेदयत् पुष्पचूलभूपतये ॥ सोऽपि ततो दासेरीं,
प्रैषीद्दुहितुः पदे रुचिराम् ॥ ११७ ॥ भूषणभृतेति सुपरि–च्छदेति तां नृपसुतां जनो मेने ॥ उत्तेजिता मणियुता, कनक-
मिवाभाति रीतिरपि ॥ ११८ ॥ गणिकाप्रेमेव मनो–बाह्यं कृत्वा महोत्सवं चुलनी ॥ तामथ पुरे प्रविष्टां, न्यवाहयद्ब्रह्मदत्तेन
॥ ११९ ॥ लोकं विसृज्य तनयं, प्रैषीदथ संस्नुषं जतुगृहे सा ॥ सोऽपि वधू–वरधनुयुग्, विसृष्टतन्त्रो ययौ तस्मिन् ॥ १२० ॥
तल्प च गतेर्द्धरात्रे, वार्त्ताभिः सचिवसूनुरचिताभिः ॥ तत्राज्वलयज्ज्वलनं, जतुवेश्मनि निजनरैश्चुलनी ॥ १२१ ॥ दीर्घ–चुल-
न्योरयश, इव धूमो व्यानशेऽथ भूवलयम् ॥ तत्स्पर्द्धयेव परित–स्तत्सदनं व्यापदनलोऽपि ॥ १२२ ॥ सम्भ्रान्तोऽथ
कुमारः, किमेतदिति मन्त्रिनन्दनमपृच्छत् ॥ सोऽप्यब्रवीदिदं खलु, चुलनीदुश्चेष्टितं निखिलम् ॥ १२३ ॥ सत्रं यावत्पित्रा,
तदिह सुरङ्गा कृतास्ति पातु त्वाम् ॥ तद्द्वारमितः प्रविश, प्रकाश्य पार्ष्णिप्रहारेण ॥ १२४ ॥ छद्मसुदन्तमश्वं मम, पिता न्यवेदयदतस्तव
श्वसुरः ॥ प्रैषीद्दासीमेनां, तत् प्रतिबन्धं विमुञ्चास्याः ॥ १२५ ॥ तेनेत्युक्तो नृपभू–र्भूपुटमास्फोट्य पार्ष्णिघातेन ॥ सुहृदा समं सुरङ्गां,
विवेश योगीव भूविवरम् ॥ १२६ ॥ आसौ च सुरङ्गान्ते, तुरगावारुह्य मन्त्रिणा दत्तौ ॥ तौ जग्मतुः कुमारौ, पञ्चाशद्योजनानि द्राक्
॥ १२७ ॥ तत्र च विहाय वाहौ, गुरुमार्गातिक्रमश्रमेण मृतौ ॥ क्रोष्टुकसञ्ज्ञमगातां, ग्रामं तौ पादचारेण ॥ १२८ ॥ स्माहाथ भूप-
भूरिति, मां पीडयतः सखे ! क्षुधोदन्ये ॥ क्षणमिह तिष्ठ स्वामि–न्नित्यूचे तं च सचिवसुतः ॥ १२९ ॥ किञ्चिच्च विचार्य दिवा-
कीर्तिं ग्रामात्ततः समाकार्य ॥ तौ वपनमकारयतां, चूडामात्रं त्वधारयताम् ॥ १३० ॥ सन्ध्याभ्राणीव रवि–स्तेतरुची धातुरक्तवस-

१ पिलकम् । २ सवधूक । ३ विसर्जितपरिवारः । ४ पादघातेन । ५ सुरङ्गान्तम् । ६ क्षुत्पिपासे । ७ नापितम् । ८ मुण्डनम् ।

नानि ॥ परिधाय न्यक्षिपत्तां, स्वकण्ठयोर्भ्रमदेश्म तौ ॥ १२१ ॥ वरधनुरथभूपसुतः, श्रीवत्सालङ्कृतं हृदयपद्मम् ॥ चतुरङ्गुलपट्टेन,
न्यधादहो ! रिपुभयं प्रबलम् ॥ १२२ ॥ वेषान्तरमिति कृत्वा, ग्रामान्तरस्तौ गतौ द्विजः कश्चित् ॥ भोजनकृते न्यमन्त्रय-दभोजयच्चा-
तिगौरवतः ॥ १२३ ॥ अथ मूर्ध्नि ब्रह्मसुतो-ऽक्षतान् क्षिपन्ती द्विजप्रिया प्रमदात् ॥ सितवसनयुगं कन्यां, चोपानिन्येऽप्सरःकल्पाम्
॥ १२४ ॥ ऊचेऽथ वरधनुः किं, ददास्यमुमस्य निष्कलस्य बटोः ? ॥ नयति नखविरुचिरां, हारलतां कोपि करभङ्गे ! ॥ १२५ ॥
तत इत्यवदद्विप्रो, बन्धुमती सम्भका मम सुतासौ ॥ अस्याश्च वरश्चक्री, भावीत्युक्तं निमित्तज्ञैः ॥ १२६ ॥ पट्टाच्छादितहृदयो,
भुङ्क्ते यस्तव गृहे समित्रस्तम् ॥ जानीया दुहितुर्वर-मिति तैरेव च मम प्रोक्तम् ॥ १२७ ॥ योग्याय सुविद्यामिव, ददे तदेनां कनी-
महममुष्मै ॥ प्राणप्रियां सुतां खलु, यच्छामि यथातथा न सखे ! ॥ १२८ ॥ तामथ परिणीय कनीं, नृपभूः स्थित्वा च तत्र तां
रजनीम् ॥ सद्भावं भार्यायै, प्रोच्य समित्रोऽचलत्प्रातः ॥ १२९ ॥ दूरग्रामं च गतौ, शुश्रुवतुस्ताविदं जनश्रुत्या ॥ सर्वेऽध्वानो रुद्धा,
दीर्घेण ब्रह्मदत्तकृते ॥ १४० ॥ प्राणत्राणकृते तौ, गच्छन्तावुत्पथेन तच्छ्रुत्वा ॥ प्रापतुरटवीमेकां, तत्र च नृपभूरभूत्तृषितः ॥ १४१ ॥
तमथ वटाधो मुक्त्वा, द्रुतं गतो वरधनुः कृते पयसः ॥ उपलक्ष्य दीर्घपुरुषैः, सायं कुट्टे च जगृहे च ॥ १४२ ॥ सोथ पलाय-
नसञ्ज्ञां, ब्रह्मसुतो व्यधित हन्यमानस्तैः ॥ तूर्णं ततः कुमारो, ननाश पादद्रुताह्लादः ॥ १४३ ॥ वेगादुत्पतञ्च पतितः, कान्तारे
पूर्वपित इव गहने ॥ विरसफलानि स बुभुजे, दुरवस्थायां हि किमभक्ष्यम् ॥ १४४ ॥ भ्राम्यंश्चैकं तापस-मह्नि तृतीये ददर्श नृप-
तिसुतः ॥ प्रवहणमिवाब्धिपतित-स्तं च प्राप्याधिकं मुमुदे ॥ १४५ ॥ कुत्रासि भद्र्यात्रा—माश्रम इति तं वदन्तमथ स मुनिः ॥

१ तपस्वीर्न । २ बन्धाति । ३ अङ्गुल्के ।

नीत्वाश्रममुपकुलपति, निन्ये व्रतलिप्सुमिव सद्यः ॥ १४६ ॥ तं च प्रणतं प्रणया—दित्यलपत्कुलपतिः कृपाजलधिः ॥ कस्त्वं किमि-
हायासी—र्वीरोऽपि दुर्गमे गहने ? ॥ १४७ ॥ नृपभूस्ततः स्ववृत्तं, प्राह यथावृत्तमखिलमपि तस्मै ॥ तच्च श्रुत्वा कुलपति—
रित्यवदत्प्रमदगद्गदगीः ॥ १४८ ॥ ब्रह्मनृपस्य भ्राता, लघुरहमस्मि त्वदीयतातस्य ॥ तत्प्राप्तोऽसि स्वगृहं, तिष्ठ सुखं वत्स ! मा
भैषीः ॥ १४९ ॥ तेनेति वाढमुदितो, मुदितस्तत्राश्रमे कुमारोऽस्थात् ॥ आगाच्च जलदकालः, काल इव निदाघदाहस्य ॥ १५० ॥
तमथ पितृव्यः प्रेम्णा, सविशेषमपाठयत्कलाः सकलाः ॥ पात्रे दत्ता श्रीरिव, विद्या हि स्यादनन्तफला ॥ १५१ ॥ जातेऽथ
शरत्काले, कन्दादिकृते वनं ययुर्मुनयः ॥ ब्रह्मसुतोऽपि समं तै—र्ययौ निषिद्धोऽपि कुलपतिना ॥ १५२ ॥ तत्र च फलकुसुमभरै—
र्नमितानमितान् स भूरुहः पश्यन् ॥ वनगजमेकमपश्य—द्युवराजमिवाद्रिराजस्य ॥ १५३ ॥ तस्यानुपदमयासी—न्निवार्यमाणोऽपि
तापसैर्नृपभूः ॥ तेनाहूतः सद्यो, वलते व्यालोऽपि रोषान्धः ॥ १५४ ॥ तटिनीपूरमिव द्रुत—मायान्तं तं च वञ्चयितुं मनसा ॥ प्रक्षिप्तमु-
त्तरीयं, क्रीडारसिकेन भूपभुवा ॥ १५५ ॥ तत्तु करेण गृहीत्वा, प्राक्षिपदन्तर्नभः क्रुधा कुम्भी ॥ निपतच्च ततो नृपभू—स्तदाददे
वञ्चितद्विरदः ॥ १५६ ॥ क्रीडाभिरिति क्रीडति, तस्मिन् करिणा समं कृताटोपः ॥ जलधाराभिर्जलदः, शरैरिवोपाद्रवच्चमिभम्
॥ १५७ ॥ तस्मिंस्ततः प्रणष्टे, द्विपे कुमारोऽपि जातदिग्मोहः ॥ भ्राम्यन्नितस्ततः शैल—निम्नगामुत्ततारैकाम् ॥ १५८ ॥ तस्याश्च तटे
नगरं, पुराणमुद्वसमुदीक्ष्य पतितगृहम् ॥ तत्र प्रविशन्नेकं, वंशकुडङ्गं ददर्श घनम् ॥ १५९ ॥ तत्पार्श्वे फलकासी, दृष्ट्वा शस्त्रप्रियोऽगृही-
न्नृपभूः ॥ तं वंशकुडङ्गं चा—सिनाच्छिनत्तत्परिक्षायै ॥ १६० ॥ तस्माद्विनिर्गतमथ, स्फुरदधरपुटं स्फुटं समीक्ष्य शिरः ॥ सम्भ्रान्तो

१ वर्षाऋतुः । २ ग्रीष्मदाहस्य । ३ पुष्कलान् । ४ मुनयः । ५–६–७ हस्ती । ८ गजे । ९ 'खड्ग' इति भा० ।

ब्रह्मसुतः, सम्यगवालोकयद्यावत् ॥ १६१ ॥ उद्बद्धाङ्घ्रेर्धूमं, पिबतः कस्यापि तावदतिपीनम् ॥ दृष्ट्वा [1]कबन्धमुच्चैः-स्वापदनुतापसन्तापम् ॥ १६२ ॥ [2]निर्मन्तुरपि हतोयं, हा ! विद्यासाधको मया कश्चित् ॥ तन्मां क्रीडारसिकं, धिगिति निनिन्दायमात्मानम् ॥ १६३ ॥ पुरतो गच्छंश्चैकं, प्रासादं सप्तभूमिकमपश्यत् ॥ अतिनन्दनेन परितः, परीतमुद्यानवलयेन ॥१६४॥ साक्षाद्दिवीव तस्मि-न्नारूढो [3]निर्जरीमिव सुरूपाम् ॥ कुवलयदलविपुलाक्षी-मद्राक्षीत्कन्यकामेकाम् ॥ १६५ ॥ सोथ शुभे ! कासि त्वं, तिष्ठसि वा कथमि-हेत्यपृच्छत्ताम् ? ॥ [4]धृतसाध्वसा ततः सा-ऽप्यदोऽवदद्गद्गदैर्वचनैः ॥१६६॥ वृत्तान्तोस्ति महान्मे, तद्वद कोसि त्वमिह किमायासीः ? ॥ इति तद्गिरा स मुदितो, वचनेनायोजयद्वदनम् ॥ १६७ ॥ पाञ्चालपतेर्ब्रह्म-प्रभुः सुतो ब्रह्मदत्तनामाहम् ॥ इति सोवादीद्याव-न्मुदिता सा तावदुत्तस्थौ ॥ १६८ ॥ नयनाञ्जलितो गलितैः, सा प्रमदा प्रमदबाष्पसलिलभरैः ॥ रचयन्ती पाद्यमिव, न्यपतच्च तद-ङ्घ्रि[5]नलिनयुगे ॥ १६९ ॥ [6]अत्राणयात्र मयका, दिष्ट्या शरणं शरण्य ! लब्धस्त्वम् ॥ इति च वदन्ती रुदन्ती, [7]सुदती साश्वासि भूप-भुवा ॥१७०॥ पृष्टा च का ? त्वमिति सा, प्रोचेऽहं पुष्पचूल[8]भूजानेः ॥ त्वन्मातुलस्य तनया, तुभ्यं दत्तास्मि पुष्पवती ॥ १७१ ॥ परिणयदिनोत्सुकां रम-माणामारामदीर्घिकापुलिने ॥ हृत्वाऽन्येद्युर्विद्या-धराधमो मामिहानैषीत् ! ॥ १७२ ॥ कालमियन्तं बन्धुजन-विरहदावाग्नितप्तगात्राहम् ॥ त्वद्दृष्ट्याऽमृतवृष्ट्या, क्लिन्ना निर्वापिताद्य विभो ! ॥ १७३ ॥ क्व गतोस्ति ? स मे रिपुरिति, पृष्टा सा नृपसुतेन पुनरवदत् ॥ तेन किल पठितसिद्धा—ऽर्पितास्ति मे शाङ्करी विद्या ॥ १७४ ॥ सा हि स्मृता विधत्ते, परिच्छदीभूय कृत्यमखिलमपि ॥ विनयत्युपद्रवं मे, पृष्टा चाख्याति तद्वार्ताम् ॥ १७५ ॥ तां पृष्ट्वेदं वच्मी—त्युक्त्वा स्मृत्वा च तां पुनः

---

१ रुण्डम् । २ निरपराधी । ३ देवीम् । ४ धृतभया । ५ नलिनं कमलम् । ६ रक्षणरहितया । ७ शोभनदशना । ८ भूजानिः नृपः ।

साध्यत् ॥ येनाहृतास्मि नाद्यो—न्मत्तः स हि खेचरो नाम्ना ॥ १७६ ॥ मम तेजोऽसहमानो, मुक्त्वा विद्याकृतेत्र धामनि माम् ॥ विद्यां साधयितुमगा—न्मेरुकुञ्जके स्वयं नष्टे ॥ १७७ ॥ तत्रोर्द्धपदो धूमं, पिबतो विद्याद्य सेत्स्यति स्वामिन् ! ॥ विद्याबलोर्जितबलः, परिणेष्यति मा ततः स कुधीः ॥ १७८ ॥ अथ तद्वधव्यतिकरे, तेनोक्ते साधु कृतमिति ब्रुवती ॥ मुमुदे भृशं कनी सा, प्रियलाभादप्रियोच्छेदात् ॥ १७९ ॥ अथ तामुदूह्य कन्यां, गान्धर्वविवाहरचनया नृपभूः ॥ रमयन् विविधैः सुरतै—स्तां क्षणदां क्षणमिवाक्षपयत् ॥ १८० ॥ प्रातश्च खेचरीणां, ध्वनिमवनिधवाङ्गजोऽम्बरे श्रुत्वा ॥ कियंति भवति कस्यायं, ध्वनिरिति पप्रच्छ पुष्पवतीम् ? ॥ १८१ ॥ सा प्रोचे प्रिय ! नाद्यो—न्मत्तादस्त्वद्रिपोरिमे जाम्यौ ॥ भ्रातुः कृते विवाहो—पस्करमादाय सकलमपि ॥ १८२ ॥ खण्डाविशाखिकाऽऽख्ये, खेचरकन्ये मुधा समायातः ॥ कार्यं ध्यातमितरथा, दैवेन त्वन्यथा घटितम् ! ॥ १८३ ॥ [युग्मम्] तत्तावदपसर त्वं, यावत्सङ्कीर्त्य तव गुणान् प्रगुणान् ॥ जानाम्यनयोर्भावं, त्वयि रागविरागयोः स्वामिन् ! ॥ १८४ ॥ रागे चलयिष्यामि, ध्वजमरुणं वीक्ष्य तं त्वमागच्छेः ॥ रागाभावे तु सितं, तच्च प्रेक्ष्यान्यतो गच्छेः ॥ १८५ ॥ अभयोपि ततो नृपभू—रत्तस्थौ गत्वान्यतस्तदनुवृत्त्या ॥ अथ पुष्पवती श्वेतं, चलयामास क्षणात् केतुम् ॥ १८६ ॥ तं च प्रेक्ष्य कुमारः, शनैः शनैः प्रस्थितोऽन्यतो गन्तुम् ॥ उल्लङ्घ्य वनं दुर्गम—मेकमविन्दत सरः सायम् ॥ १८७ ॥ तत्र स्नात्वा सलिलं, निपीय पीयूषसरसमथ सरसः ॥ निर्गत्य प्रत्यस्तुत—स्तटमुत्तरपश्चिमं भेजे ॥ १८८ ॥ तत्र च कन्यां काञ्चि—त्समीक्ष्य जलदेवतामिवाध्यक्षाम् ॥ सफलं जन्म ममाभू—दद्येति नृपाङ्गजो दध्यौ ॥ १८९ ॥ तद्दर्शनामृतरसं, पायं पायं व्यपायविकलं सः ॥ ग्रीष्मे पयः पिबन्मरु—पान्थ इव

१ परिणीय । २ नृपपुत्रः । ३ खे । ४ भगिन्यौ । ५ विवाहसामग्रीम् । ६ ध्वजम् । ७ प्रत्यक्षाम् । ८ विघ्नरहितम् । ९ मरुदेशाध्वन्यः ।

प्राप नो धृतिम् ॥ १९० ॥ सापि च तं पश्यन्ती, कटाक्षविक्षेपदक्षचक्षुर्भ्याम् ॥ दास्या समं च किञ्चि–द्वदन्त्यगादन्यतः कन्या ॥ १९१ ॥ तन्मार्गदत्तदृष्टिः, प्रास्थित यावत्ततोन्यतो नृपभूः ॥ सा दास्याऽऽगात्तावत्, पटयुगताम्बूलकुसुमधरा ॥ १९२ ॥ तच्च प्रदाय तस्मै, जगौ त्वया या सरस्तटे दृष्टा ॥ निजचित्तमिव तयेदं, प्रेषितमस्ति प्रभो ! तुभ्यम् ॥ १९३ ॥ प्रोक्तं च तया यदसौ, सुभगः पितृमन्त्रिमन्दिरे नेयः ॥ स हि वेत्ति सकलमुचितं, तत्रागच्छ प्रभो ! तत्त्वम् ॥ १९४ ॥ सोथागमत्सह तया, सदनं सचिवस्य नागदत्तस्य ॥ अभ्युत्तस्थौ सोपि, तमतिथिं चिरमीलितमिष्टमिव ॥ १९५ ॥ प्रहितोऽस्ति वो गृहेऽसौ, सुभगः श्रीकान्तया नृपतिपुत्र्या ॥ प्रोच्येति ययौ दासी, भेजे सचिवोपि तं प्रभुवत् ॥ १९६ ॥ दोषात्यये च निन्ये, राजकुले धीसखः कुमारं तम् ॥ भूपोपि तमर्घादिभि–रुपतस्थे तरणिमिव बालम् ॥ १९७ ॥ आतिथ्यमिदं क्रियते, तवातिथेरिति वदंश्च क्ष्मापः ॥ तस्मै ददौ सुतां ता–मुदुवाह मुदा कुमारोपि ॥ १९८ ॥ अज्ञातकुलस्यैका–किनोपि ददासि मे कथं पित्रा ? ॥ इत्यन्यदा रहसि तां, रमयन् पप्रच्छ नृपतिसुतः ॥ १९९ ॥ साऽवादीज्जनको मे, वसन्तपुरराजशबरसेनसुतः ॥ उन्मीलितः स्वराज्या–द्गोत्रिभिरागादिमां पल्लीम् ॥ २०० ॥ भिल्लान् विधाय वशगा–नत्रत्यान् सबलवाहनस्तिष्ठन् ॥ ग्रामादिलुण्टनैः स्वं, पुष्णाति परिच्छदं तातः ॥२०१॥ तनयचतुष्कस्योपरि, पितुरिह वसतः सुतास्म्यहं जाता ॥ देव्यां श्रीमत्यां सुर–वल्लीव सुमेरुवसुधायाम् ॥ २०२ ॥ मां प्राप्तयौवनां यावदत् पिता मम नृपा द्विषो निखिलाः ॥ तदिहस्था वीक्ष्य वरं, निवेदयेमें मनोमीष्टम् ॥ २०३ ॥ पश्याम्यखिलान् पान्थां–स्ततोन्वहमिह स्थिता सरस्तीरे ॥ त्वां च प्राप्तं सुरतरु–मिव दुष्प्रापं प्रचुरपुण्यैः ॥ २०४ ॥ इति किञ्चिदनापृच्छ्या–ऽर्पितास्म्यहं

---

१ रात्रिव्यत्यये । २ सूर्यम् । ३ राजा ।

तुभ्यमीश ! तातेन ॥ उदितस्तयेति मुदित—श्चिक्रीड तया समं नृपभूः ॥ २०५ ॥ पल्लीशः सोऽन्येद्यु—र्ग्रामं हन्तुं जगाम सैन्ययुतः ॥ तेन सह भूपभूरपि, दस्युकटकसंकटे ययौ ॥ २०६ ॥ ग्रामेऽथ लुण्ठ्यमाने, पपात वरधनुरुपेत्य तत्क्रमयोः ॥ आलम्ब्य च तत्कण्ठं, विमुक्तकण्ठं रुरोदोच्चैः ॥ २०७ ॥ ब्रह्मात्मजेन वचनै—रमृतद्रवसोदरैरथाश्वास्य ॥ पृष्टो वरधनुरूचे, स्ववृत्तमिति गद्गदैर्वचनैः ॥ २०८ ॥ मुक्त्वा तदा वटाध—स्त्वामम्भोऽर्थं गतोऽहमब्जसरः ॥ किञ्चिदपश्यं तज्जल—मब्जदलपुटेन जगृहे च ॥ २०९ ॥ वलितश्च दीर्घपुरुषै—रुदायुधैर्हतहतेति जल्पद्भिः ॥ सन्नद्धैः रुद्धोऽहं, हंसः काकैरिव कठोरैः ॥ २१० ॥ क्व ? ब्रह्मदत्त इति तैः, पृष्टश्चाब्रवमहं न वेद्मीति ॥ गाढमथ ताडितस्तै—र्वदं व्याघ्रेण जग्ध इति ॥ २११ ॥ दर्शय तं देशमथे—त्युक्तो भ्राम्यन्नितस्ततो दम्भात् ॥ त्वद्दर्शनपथमेत्य, व्यधां पलायनकृते सञ्ज्ञाम् ॥ २१२ ॥ स्वमुखे तु परिव्राजक—दत्तां गुटिकां ततोऽक्षिपं क्षिप्रम् ॥ तस्याः प्रभावतो गत—चेष्टस्त्यक्तोऽस्मि मृत इति तैः ॥ २१३ ॥ तेषु च गतेषु दूरं, कृष्ट्वा गुटिकां मुखात्त्वदर्थमटन् ॥ ग्रामं कमपि गतोऽहं, कञ्चिद्पश्यं परिव्राजम् ॥ २१४ ॥ सोऽप्यवददवनतं मां, वसुभागाह्वोऽस्मि तव पितुर्मित्रम् ॥ तद्ब्रूहि वरधनो ! त्वं, क्वास्ति ब्रह्मदत्त इति ? ॥ २१५ ॥ विश्वस्य तस्य विश्वां, त्वद्वार्त्तां सन्ततामहमवोचम् ॥ दुःखाविष्टः स ततः, पार्श्वेऽयं वृत्तमित्यूचे ॥ २१६ ॥ दग्धे तदा जतुगृहे, दीर्घः प्रातर्ददर्श शबमेकम् ॥ तां सत्रगां सुरङ्गां, तुरगपदानि च पुरस्तस्याः ॥ २१७ ॥ नष्टौ युवां धनुर्धिया, ज्ञात्वा कुपितस्ततो नृपस्तस्मै ॥ प्रत्याशमश्ववारान्, युष्मन्निग्रहकृते प्रैषीत् ॥ २१८ ॥ नष्टो धनुरिति जननीं, तवाक्षिपत् श्वपचपाटके दीर्घः ॥ सा नरकावास इवा—नुभवति तत्र व्यथाः प्रचुराः ॥ २१९ ॥ तेनोदन्तेनोच्चै—र्दुःखोपरिजायमानदुःखार्त्तः ॥

१ चरणयोः । २ जलार्थम् । ३ कमलसरोवरम् । ४ सर्वाम् । ५ सततम् । ६ पश्चाद्भवम् । ७ वृत्तान्तेन ।

उद्धर्तुं व्यसनाब्धे–र्जननीं काम्पील्यनगरमगाम् ॥ २२० ॥ तत्र च कपालिरूपं, कृत्वाटं श्वपचपाटके कपटात् ॥ तस्मिन् भ्रमण-निदानं, लोकैः पृष्टोऽब्रवं चैवम् ॥ २२१ ॥ मातङ्गीविद्यायाः, साधनविधिरयमिति भ्रमाम्यत्र ॥ तत्रैवमटन् मैत्रीमकार्षमारक्षकेण समम् ॥ २२२ ॥ कुरुतेऽभिवादनमसौ, कौण्डीन्यमहाव्रती सुतसुहृच्चे ॥ इत्यन्यदा च जननी–मवोचमारक्षकमुखेन ॥ २२३ ॥ गुटिकायुतमपरदिने, मातुरदां मातुलिङ्गमभिगम्य ॥ तद्भक्षणेन साजनि निश्चेष्टा काष्ठमूर्त्तिरिव ॥ २२४ ॥ आरक्षकोथ राज्ञे, गत्वोचे तां मृतां ततो नृपतिः ॥ तां संस्कर्त्तुं प्रैषी–द्भृत्यानथ तेपि तत्रागुः ॥ २२५ ॥ सम्प्रति संस्कारेऽस्याः, कृते महान् भाव्युपद्रवो भवताम् ॥ नृपतेश्चेत्युदितास्ते, मया यथागतमगुर्भीताः ॥ २२६ ॥ आरक्षकं चावोचं, साहाय्यं चेत्करोषि नष्टमुष्याः ॥ कुणपेन लक्षणवता, मन्त्रमहं साधयाम्येकम् ॥ २२७ ॥ तत्प्रतिपन्नेन समं, तेन समादाय सायमहमम्बाम् ॥ गत्वा दूरं पितृवनं, गुरुमण्डलमालिखं दम्भात् ॥ २२८ ॥ शून्यं विधिं च कश्चि–द्विधाय दातुं बलिं पुरसुरीणाम् ॥ प्रेष्यारक्षं गुटिका–मार्पयमपरामहं मातुः ॥ २२९ ॥ अथ तत्क्षणमुत्तस्था–वपगतनिद्रेव लब्धसञ्ज्ञा सा ॥ आवेद्य स्वं तामथ, निवार्य रुदतीं ततोऽचलयम् ॥ २३० ॥ मुक्त्वा कच्छग्रामे, तातसुहृद्देवशर्मवेश्मनि ताम् ॥ त्वामन्वेष्टुं भ्राम्य–न्निहागमं भाग्ययोगेन ॥ २३१ ॥ नाथ ! त्वयानुभूतं, सुखदुःखं यत्ततःपरं वद तत् ॥ तेनेत्युक्तोवादी–स्त्वं शृणु ब्रह्मदत्तोपि ॥ २३२ ॥ अथ कोप्यागत्योचे, ताविति भो ! दीर्घनृपभटा ग्रामे ॥ युष्मत्समरूपाङ्कित–पटयुगदर्शनपरा ब्रुवते ॥ २३३ ॥ ईदृशरूपौ पुरुषौ, दृष्टौ कापीति तन्निशम्याहम् ॥ कथयामि तामथ युवां, यथोचितं तनुतामात्महितम् ॥ २३४ ॥ प्रोच्येति गते तस्मि–न्नश्यन्तौ तावरण्यमध्येन ॥ क्रमयोगात्कौशाम्बी–पुर्या उपवनमुपागाताम् ॥२३५॥

---

१ बीजपुरम् । २ शमेन ।

तत्र पणीकृतलक्षं, चरणायुधरणमपश्यतां धनिनोः ॥ बुद्धिल-सागरदत्ता-मिथयोः शस्त्रायिताङ्घ्रिनखम् ॥ २३६ ॥ तत्र च बुद्धिलचरणा-युधेन जात्येपि कुक्कुटेऽन्यस्मिन् ॥ भग्ने वरधनुरसम-श्रमसाऽसहः सागरमदोऽवक् ॥ २३७ ॥ जात्योपि कुक्कुटोसौ, भग्नस्तव सागरामुनापि कथम् ? ॥ तद्यदि वदसि तदाहं, विलोकयाम्येनमादाय ॥ २३८ ॥ सोथ जगौ भ्रातस्त्वं, प्रसद्य मयि सद्य एव पश्येदम् ॥ मानापगमो व्यथयति, मामन्तर्न तु धनापगमः ॥ २३९ ॥ वरधनुरथ तं पश्यन्, ददर्श तच्चरणयोरयःसूचीः ॥ तच्च ज्ञात्वा तं द्रुत-मुपेत्य बुद्धिल इति प्रोचे ॥ २४० ॥ यदि मे छद्म न वक्ष्यसि, लक्षार्द्धं तव तदा प्रदास्येऽहम् ॥ तेनेत्युक्तो वरधनु-रूचे तद्वदसि भूपभुवे ॥ २४१ ॥ सूचीः कृष्ट्वा स तत-स्तं सागरकुक्कुटेन योजितवान् ॥ अपसूचिकं च बुद्धिल-कुक्कुट-मपरो द्रुतमजैषीत् ॥ २४२ ॥ तुष्टोथ सागरस्ता-वारोप्य रथं स्वमन्दिरमनैषीत् ॥ स्वगृह इव तद्गृहे ता-वपि तस्थतुरुचितलीलाभिः ॥ २४३ ॥ बुद्धिलदासस्तत्रा-गतोन्यदा वरधनुं रहसि नीत्वा ॥ प्रोचे यत्तव कथितं, लक्षार्द्धं बुद्धिलेन तदा ॥ २४४ ॥ तत्स्थाने तेनासौ, हारः प्रहितोस्ति चतुरंयुतमूल्यः ॥ इत्थं प्रोच्य करण्डं, दत्त्वा च यथागतः सोगात् ॥ २४५ ॥ वरधनुरपि गत्वा तन्निवेद्य निखिलं करण्डमुद्घाट्य ॥ मौक्तिकरुचिजितसितरुचि-मदीदृशन्नृपभुवे हारम् ॥ २४६ ॥ हारे हारिणि तत्राव-लम्बितं लेखमात्म-नामाङ्कम् ॥ दृष्ट्वा नृपभूः सुहृदं, कस्यासौ लेख इत्यूचे ॥ २४७ ॥ को वेत्ति कस्यचिदयं, त्वत्समनाम्नस्तवाथवा भवी ॥ तेनेत्युदितो गाढो-त्सुकोभवन्नृपभूर्ज्ञातुम् ॥ २४८ ॥ लेखं तमथो वरधनु-रुन्मुद्रयति स्म नलिनमिव तरणिः ॥ आर्यामेकां लिखितां, तत्र दद-र्शालिपङ्क्तिमिव ॥ २४९ ॥ सा चेयं—"यद्यपि जनोर्थ्यतेसौ, जनेन संयोगजनितयत्नेन ॥ त्वामेव हि रत्नवती, तथापि मानयि-

१ ताम्रचूडयुद्धम् । २ चत्वारिंशत् सहस्रमूल्यः । ३ सितरुचिः चन्द्रः । ४ कमलमिव अर्कः ।

तुमभिलषति ॥ २५० ॥" भावार्थोऽस्या ज्ञेयः, कथमित्यथ नरभानौ विचिन्तयति ॥ आगाद्द्वितीयदिवसे, तदन्तिके तापसी वत्सा ॥ २५१ ॥ आशीर्वादं दत्त्वा, क्षिप्त्वा कुसुमाक्षतानि शिरसि तयोः ॥ नीलान्यतो वरधनुं, निगद्य किञ्चिच्च सापि ययौ ॥ २५२ ॥ आगतमथ सुहृदं नृप-पुत्रः प्रोचेऽनया किमुक्तमिति ? ॥ सोऽवददयाचदेषा, प्रतिलेखं प्राच्यलेखस्य ॥ २५३ ॥ श्रीब्रह्मदत्तनामा-ङ्कितो ह्यसौ लेख इति वद त्वं मां ॥ को ब्रह्मदत्त इति ? सा, मयानुयुक्तेति पुनरवदत् ॥ २५४ ॥ अत्रास्ति श्रेष्ठिसुता, रत्नवती नाम सुन्दरीरत्नम् ॥ आबाल्यादपि सा म-य्यनुरक्ता प्राप तारुण्यम् ॥ २५५ ॥ तामन्यदा विमनसं, दृष्ट्वा गत्वा तदन्तिकमवोचम् ॥ का ते चिन्तेति ? ततो, मामिति तत्परिजनोवादीत् ॥ २५६ ॥ अस्या हि दौर्मनस्ये, भूयांसि दिनानि जज्ञिरे मातः ! ॥ अथ पृष्टा सा पुनरपि, जगौ न किमपि ह्रिया यावत् ॥ २५७ ॥ अवदत्तावत्तस्याः, प्रियङ्गुलतिकाह्वया प्रियवयस्या ॥ न हि वक्ति लज्जयासौ, तदहं ते वच्मि मातरिदम् ॥ २५८ ॥ भ्रातुर्बुद्धिलनाम्नः, सागरनाम्नश्च [1]ताम्रचूडरणे ॥ इयमुपवनं गतैकं, कुमारमुत्तमतममपश्यत् ॥ २५९ ॥ ईदृश्यभूत्ततोऽसौ, तयेति कथिते स्मरव्यथाक्रान्ताम् ॥ निश्चित्य तामवोचं, सद्भावं ब्रूहि मे वत्से ! ॥ २६० ॥ अथ कथमपि साप्यूचे, मातर्यस्ते प्रियङ्गुलतयोक्तः ॥ स ब्रह्मदत्तनामा, पतिर्न चेन्मे तदा मरणम् ॥ २६१ ॥ घटयिष्ये तव कामित-मित्यधृतिं मा कृथा वृथा वत्से ! ॥ तत इति मयोदिता सा, किञ्चित्स्वस्थेति पुनरूचे ॥ २६२ ॥ भाव्यखिलमीहितं मे, मातर्देव्या इव प्रसादात्ते ॥ तस्मै ज्ञापयितुमद-स्तदपि क्रियतामुपायोयम् ॥ २६३ ॥ क्षिप्त्वा करण्डमध्ये, हारममुं युतमनेन लेखेन ॥ प्रेषय तस्मै क्षिप्रं, व्यपदेशाद्बुद्धिलभ्रातुः ॥ २६४ ॥ तथास्मा दत्तममुं, लास्यति सद्योऽन्यथा तु लाति न वा ॥ लक्षार्द्धं युक्तमभू-

१ चरणायुधयुद्धे । २ कामदुःखपीडिताम् । ३ युग्मम् ।

त्सुहृदो बुद्धिलेन तदा ॥ २६५ ॥ प्रोच्येति तया दत्तौ, हारो लेखश्च दासहस्तेन ॥ प्रहितौ मया गतेऽहनि, तत्प्रतिलेखोऽर्प्यतामधुना ॥ २६६ ॥ उक्त्वेति तस्थुषी सा, स्वत्प्रतिलेखे मयार्पिते तु ययौ ॥ आर्या तत्र च लेखे, लिखितासौ वर्त्तते स्वामिन् ! ॥२६७॥ "उचितत्वाद्वरधनुना, सुहृदोक्तो ब्रह्मदत्तनामापि ॥ श्रीरत्नं रत्नवती-मिच्छति गोविन्द इव कमलाम् ॥ २६८ ॥" श्रुत्वेति मित्रवचनं, तां द्रष्टुं भूपभूरभूदुत्कः ॥ अन्येद्युराकुलतया, वरधनुरागत्य तं प्रोचे ॥ २६९ ॥ अन्नावामन्वेष्टुं, प्रहिता दीर्घेण सन्ति निजपुरुषाः ॥ तद्वचनादत्रत्यो, नृपोपि तदुपक्रमं कुरुते ॥ २७० ॥ तत्किं कर्तव्यमिति, ध्यायन्तौ सागरोऽवनिगृहे तौ ॥ क्षिप्त्वा जुगोप निधिव-द्रविरप्यपराम्बुधावविशत् ॥ २७१ ॥ निशि निर्गममिच्छन्तौ, तौ रथमारोप्य कमपि पन्थानम् ॥ नीत्वा सागरदत्तो, ववले बष्पायितोऽश्वियुगः ॥ २७२ ॥ तावथ पुरः प्रयान्तौ, शस्त्राढ्यरथस्थितां वने वनिताम् ॥ ददृशतुरियती वेला, किं वां लग्नेति जल्पन्तीम् ॥ २७३ ॥ कावावां ? वेत्सि च कथ-मिति पृष्टा नृपभुवाथ सावादीत् ॥ धनसञ्चयाधिनाथः, श्रेष्ठ्यासीदिह धनप्रवरः ॥ २७४ ॥ अष्टानां तनयाना-मुपर्यहं तस्य नन्दनाभूवम् ॥ प्राप्ता च यौवनं ना-पश्यं कञ्चिद्वरं प्रवरम् ॥ २७५ ॥ स्थितमस्मिन्नुद्याने, तदर्थमाराधयं ततो यक्षम् ॥ सोपि हि भक्त्या तुष्टः, प्रत्यक्षीभूय मामवदत् ॥ २७६ ॥ श्रीब्रह्मदत्तनामा, चक्री वत्से ! तत्र प्रियो भावी ॥ स्वामिन् ! स कथं ज्ञेयो, मयेति पृष्टः स पुनरूचे ॥ २७७ ॥ यः सागर-बुद्धिलयो-रायास्यति कुर्कुटाहवे समक्षम् ॥ विश्वमनोहररूपः, श्रीवत्सी स त्वया ज्ञेयः ॥ २७८ ॥ स च मच्चैत्यसमीपे, प्रथमं ते मेलितान्यतो गच्छन् ॥ इति यक्षगिरा स्वामिन् !, जानामि त्वामहं नियतम् ॥ २७९ ॥ तन्मे मन इव रथमधि-मारोह विभो ! द्रुतं तयेत्युदितः ॥ रथमारुह्य समित्रः, क्व ? गम्यमिति तां

१ विष्णुः । २ उत्कण्ठितः । ३ भूमिगृहे । ४ अश्रुविकसनेत्रयुग्मः । ५ नारीम् । ६ धनसञ्चयापतिः । ७ आहवः रणः ।

जगौ नृपभूः ॥ २८० ॥ साख्यन्मगधपुरे मम, वसति पितृव्यो धनावहः श्रेष्ठी ॥ स हि कर्त्ता प्रतिपत्तिं, प्रचुरां तवात्र गम्यमितः
॥ २८१ ॥ इति रत्नवतीवचना-त्सुहृदा सूतेन वाहयन् वाहान् ॥ प्रापाटवीं कुमारः, कौशाम्बीविषयमुल्लङ्घ्य ॥ २८२ ॥ तत्र
सुकण्टक-कण्टक-सञ्ज्ञौ चौराधिपौ प्रबलसैन्यौ ॥ तं रुरुधतुरपहर्तुं, रथादि विशिखान् प्रवर्षन्तौ ॥ २८३ ॥ चापमुपादाय ततः,
प्रहरन्नृपनन्दनः शरप्रकरैः ॥ तदस्युबलमनाशय-दहंपतिस्तम इवांशुभरैः ॥ २८४ ॥ तमथोचे सचिवसुतः, श्रान्तोसि रणेन तद्रथेऽ-
त्रैव ॥ स्वपिहि क्षणं ततः सो-ऽध्यशेत सह रत्नवत्या द्राग् ॥ २८५ ॥ प्रातर्थैकां तटिनीं, प्राप्यातिष्ठन् हयाः स्वयं श्रान्ताः ॥ तत्र
च जागरितो ना-पश्यत्सुहृदं रथे नृपभूः ॥ २८६ ॥ भावी जलाय गत इति, मुहुर्मुहुरशब्दयत्कुमारस्तम् ॥ न त्वाप प्रतिवचनं,
सद्वचनं नीचवदन इव ॥ २८७ ॥ व्याकुलचेताः स ततो, बाष्पजलाविलदृशा दिशः पश्यन् ॥ रक्ताभ्यक्तमपश्यत्, स्यन्दनवदनं
नरेन्द्रसुतः ॥ २८८ ॥ हाऽहं हत इति जल्पं-स्ततोऽपतन्मूर्छितो रथोत्सङ्गे ॥ अधिगतसञ्ज्ञस्तु भृशं, व्यलपत्क्वासि ? मित्रेति
॥ २८९ ॥ तमथाख्यद्रत्नवती, प्रभो ! सखा ज्ञायते न हि मृतस्ते ॥ तत्त्वस्येदममङ्गल-मुचितं वाचापि नो कर्तुम् ॥ २९० ॥ नून-
मपृष्ट्वापि त्वां, त्वत्कार्यैव स हि गतो भावी ॥ स्थाने गतास्तु शुद्धिं, तस्य नरैः कारयिष्यामः ॥ २९१ ॥ परमिह गहने स्थातुं, नो
चिरमुचितं यमोपवनकल्पे ॥ इति तद्गिरा स तुरगा-नुदचलयदग्रतो व्यग्रः ॥ २९२ ॥ उल्लङ्घ्यानुल्लङ्घ्या-मपि तामटवीं ययौ स
मगधानाम् ॥ सीमग्रामं भवतति-मतीत्य मोक्षं मुमुक्षुरिव ॥ २९३ ॥ तत्र ग्रामसभास्थो, ग्रामपतिः प्रेक्ष्य तं रुचिररूपम् ॥ पुरुषो-
त्तमोयमिति हृदि, निरणैषीद्गृहमनैषीच्च ॥ २९४ ॥ किं भृशमुद्विग्न इवा-सीत्यथ तेनोदितो वदन्नृपभूः ॥ चौरैः सह कुर्वन् रण—

१ सारथिना । २ अश्वान् । ३ शरान् । ४ दिनकरः । ५ किरणसमूहैः । ६ रुधिरलिप्तम् । ७ रथाग्रभागम् ।

मगाद्वयस्यो मम क्वापि ॥ २९५ ॥ तस्य प्रवृत्तिमधुना, नेष्ये तन्मा कृथास्त्वमुद्वेगम् ॥ तत इत्युक्त्वा ग्रामा-धिपोऽटवीं तामवज-
गाहे ॥ २९६ ॥ आगत्य चैवमवद-द्वनेऽत्र मनुजो न कोऽप्यदर्शि मया ॥ किन्तु शरोऽसौ प्राप्तः, प्रहारपतितो रुधिरलिप्तः ॥ २९७ ॥
श्रुत्वेति हतो धरधनु-रवश्यमिति सोऽभवद्भृशं व्यग्रः ॥ रविरप्यस्ताद्रिमगा-त्तद्दुःखं द्रष्टुमसह इव ॥ २९८ ॥ यामे तुर्येऽथ निशो,
ग्रामे न्यपतन् मलिम्लुचो बहवः ॥ तांस्तु बभञ्ज कुमार-स्ततोऽस्तुवंस्तं जनास्तुष्टाः ॥ २९९ ॥ पृष्ट्वाथ ग्रामपतिं, चलितः सोमा-
त्क्रमेण राजगृहम् ॥ रत्नवतीं च व्यमुच-द्बाह्ये तापसावसथे ॥ ३०० ॥ प्रविशन् स्वयं च नगरं, सदनगवाक्षस्थिते युवत्यौ द्वे ॥
नृपभूर्ददर्श ते अपि, सविलासमवोचतामिति तम् ॥ ३०१ ॥ सस्नेहमपि जनं य-स्त्यक्त्वागास्त्वं तदा तदुचितं किम् ? ॥ सोऽवादीत्कः
स्निग्धो, जनः कदा चात्यजमहं तम् ? ॥ ३०२ ॥ एहि प्रसीद विष्टर-माश्रय विश्राम्य विभ्रमदृशा नः ॥ ताभ्यामथेति कथिते,
विवेश तद्वेश्मनि कुमारः ॥ ३०३ ॥ स्नानाशनादिभक्तिं, कृत्वा ते तस्य विष्टरगतस्य ॥ इत्यूचतुरिह भरते, वैताढ्याह्वोऽस्ति रजत-
गिरिः ॥ ३०४ ॥ शिवमन्दिरमिति नगरं, विराजते तस्य दक्षिणश्रेण्याम् ॥ तत्र नृपो ज्वलनशिखः, प्रिया च विद्युच्छिखा
तस्य ॥ ३०५ ॥ नाट्योन्मत्ताख्यसुता-नुजे तयोः प्राणवल्लभे पुत्र्यौ ॥ अभवाव वल्लभाऽऽवां, क्रमेण खण्डा-विशाखाख्ये
॥ ३०६ ॥ निजसौधकुट्टिमस्थः, सुहृदाग्निशिखेन सह सृजन् गोष्ठीम् ॥ व्रजतोऽष्टापदममरान्, ददर्श गगनेऽन्यदा तातः
॥ ३०७ ॥ नन्तुं ततो जिनेन्द्रा-नावां सुहृदं च तं सहादाय ॥ अष्टापदमौलिस्थं, चैत्यं सोगाद्विमानस्थः ॥ ३०८ ॥ तत्र च जैनीः
प्रतिमाः, प्रदक्षिणीकृत्य विधिवदभ्यर्च्य ॥ अनमाम मानवर्णा-न्विता वयं मणिमयाः सर्वाः ॥ ३०९ ॥ चैत्याच्च निर्गता द्वौ, चा-

---

१ मित्रः । २ प्रहरे चतुर्थे । ३ तापसाश्रमे । ४ आसनम् । ५ सौम्यदृष्टिना । ६ रूप्यपर्वतः ।

रणशर्मिनावशोकवृक्षाधः ॥ प्रेक्ष्य प्रणम्य शुश्रुम, धर्मकथां वयममृतकल्पाम् ॥ २१० ॥ अथ पप्रच्छाग्निशिखः, को अनयोः कन्ययोः प्रियो भावी ? ॥ तौ ज्ञानिनाववदतां, सोदरममुयोर्हनीष्यति यः ॥ २११ ॥ वचनेन तेन तातो, म्लानिमगाद्दुर्दिनेन दिनकरवत् ॥ आवामपि वैराग्या-च्चैवमवदाव निजतातम् ॥ २१२ ॥ अधुनैव देशनायां, संसारासारता श्रुताऽस्माभिः ॥ तद्विषय-सुखैर्नैवं-विधेन पर्याप्तमस्माकम् ॥ २१३ ॥ प्रावर्त्तावहि सोदर-रक्षार्थं तत्प्रभृत्यनिशमावाम् ॥ स त्वन्यदैक्षताटन्, पुष्पवतीं पुष्प-चूलसुताम् ॥ २१४ ॥ तद्रूपापहृतमना-स्ततः स द्रुतमपाहरज्जडधीः ॥ तत्तेजोऽसहमानो, विद्यां साधयितुमगमच्च ॥ २१५ ॥ यद्भूत्ततः परं त-द्यूयं स्वयमेव वित्थ सकलमपि ॥ अथ चाख्यत्पुष्पवती, तदावयोः सोदरविनाशम् ॥ २१६ ॥ शोकं च व्यप-निन्ये-स्माकं धर्माद्युगैर्मधुरवाक्यैः ॥ शङ्करविद्याशक्त्या, ज्ञात्वास्मद्वृत्तमिति च जगौ ॥ २१७ ॥ स्मरतं युवां गुरुगिरा-मिहागतं ब्रह्मदत्तमथ वृणुतम् ॥ न हि जातुचिद्विघटते, ज्ञानिवचो ग्रावरेखेव ॥ २१८ ॥ तत्स्वीकृतमावाभ्यां, रामसवशेन सा तु सितकेतुम् ॥ प्राचीचलचतस्त्वं, हित्वा वामन्यतो गतवान् ॥ २१९ ॥ नागास्त्वं तत्र यदा, त्वामन्वेष्टुं ततो वनानीं वाम् ॥ चिरमावां सम्भ्रान्ते, भ्रान्ते न तु ललित ! मिलितस्त्वम् ॥ २२० ॥ तदनु दनुजमनुजामर-जेता नेता क नौ समेतासौ ? ॥ इति पृष्टाया विद्या-देव्या वचनादिहैवावाम् ॥ २२१ ॥ अमत्पुण्याकृष्टो, दृष्टस्त्वं चेह तद्विभो ! त्वरितम् ॥ पुष्पवतीरत्पाणी-कृत्य कृतार्थय जनुरिदं नौ ॥ २२२ ॥ गान्धर्वविवाहेनो-दुवाह ते अपि ततो नरेन्द्रसुतः ॥ रममाणः सह ताभ्यां, निमेषमिव तां निशां व्यनयत् ॥ २२३ ॥ स्थातव्यं पुष्पवती-पार्श्वे तावत्सुखं खलु युवाभ्याम् ॥ यावन्मे राज्याप्तिः, स्यादित्युक्त्वा च ते व्यसृजत्

१ स्वदेशा । २ असुरनरसुरजेता । ३ भार्यां कृत्वा । ४ जन्म ।

॥ ३२४ ॥ ओमित्युक्त्वा गतयो—स्तयोस्तरोभूद्विवादे तत्सङ्कल्पम् ॥ रत्नवतीमन्वेष्टुं, ततो ययावाश्रमे नृपभूः ॥ ३२५ ॥ तत्र च तां सोऽपश्यन्, नरमेकमपृच्छदिति शुभाकारम् ॥ दृष्टा कापीह [1]वशा, त्वया गतदिनेऽथ वा प्रवरा ॥३२६॥ तेन च किं रत्नवती–कान्तस्त्वमसीति सादरं पृष्टः ? ॥ ओमित्यवदन्नृपभू–स्ततः स मुदितः पुनः प्रोचे ॥ ३२७ ॥ सा रुदती ह्यो दृष्टा, का त्वं किं रोदिषीति च मयोक्ता ॥ किञ्चिदवोचत याव–त्तावद् ज्ञाता [2]स्वदौहित्री ॥ ३२८ ॥ मत्वा च पितृव्याया–स्त्वपयं तस्यास्ततः स मुदितस्ताम् ॥ स्वगृहेनयद्भवन्तं, त्वविन्दतान्वेषयन्नपि नो ॥ ३२९ ॥ अथापि शुभमभूद्य–न्मिलितस्त्वमिति ब्रुवन्नृपसुतं सः ॥ निन्ये धनावहगृहे, तं दृष्ट्वा सोपि बहु मुमुदे ॥ ३३० ॥ सोत्सवमथ रत्नवतीं, व्यवाहयन्नृपभुवा सह श्रेष्ठी ॥ मृतकार्यमन्यदा वर—धनोरुपाकंस्त नृपतिसुतः ॥ ३३१ ॥ लुब्धत्वावेशवशा–द्द्विजेषु कुर्वत्सु भोजनमतृप्त्या ॥ तत्रागत्याऽवादी–द्वरधनुरिति विप्रवेषधरः ॥ ३३२ ॥ यदि मे दत्तादन्नमिह, साक्षाद्वरधनोर्भवति नूनम् ॥ तस्याकर्ण्य कुमार–स्ससम्भ्रममगाद्बहिर्गेहात् ॥ ३३३ ॥ तं च प्रविलोक्य दृढं, परिरभ्यानन्दबाष्पजलपूरैः ॥ स्नपयन्निव गेहान्त–र्नीत्वा पप्रच्छ तद्वार्ताम् ॥ ३३४ ॥ सोवादीत्त्वयि सुप्ते, द्रुमान्तरस्थेन तस्करेण तदा ॥ इषुणा हतोहमपतं, क्षुभ्यन्तरशां च गहनान्तः ॥३३५॥ तेषु च गतेषु दस्युषु, मीन इवान्तर्जलं तरुगणान्तः ॥ अन्तर्हितश्चरन्नह–माप्तं ग्रामं तमतिक्रच्छ्रात् ॥३३६॥ ग्रामपतेस्त्वद्वार्तां, ज्ञात्वा चागममिह क्रमेणाहम् ॥ त्वां चाद्राक्षं दिष्ट्या, सुस्वप्नमिवेहितार्थकरम् ॥ ३३७॥ अथ भूपसुतोऽवादी-द्विना पुरुषकारमेवमावाभ्याम् ॥ स्थातव्यं नश्यद्भ्यां, दस्युभ्यामिव कियत्कालम् ! ॥ ३३८ ॥ प्रादुर्भवनोपायं, चिन्तयतोरिति तयोरथान्येद्युः ॥ रममाणाखिललोको, मधूत्सवः प्रववृते त्वत्र ॥ ३३९ ॥ द्विरदस्तदा च

१ स्त्री । २ स्वपुत्रीपुत्री । ३ भोजनम् । ४ करी ।

मत्तः, स्तम्भं भङ्क्त्वापशृङ्खलो नृपतेः ॥ निरगात्त्रासितलोक-स्ततश्च भूयानभूत्तुमुलः ॥ ३४० ॥ व्यालस्तु कनीं काञ्चि-न्नितम्बव-
क्षोजभारमन्दगतिम् ॥ भयवेपमानवपुषं, वीक्ष्याधावद्ग्रहीतुं द्राक् ॥ ३४१ ॥ धीरः कोपि धरायां, यद्यस्ति तदा स पातु मां सद्यः ॥
मृत्योरिव मत्तेभा-दस्मादिति सा तदाक्रन्दत् ॥ ३४२ ॥ तस्यां शरणार्थिन्यां, विलपन्त्यामिति च दीनवदनायाम् ॥ हाहारवं प्रकुर्वति,
जने च तत्परिजने च भृशम् ॥ ३४३ ॥ तत्क्षणमेत्य ब्रह्मा-ङ्गजो गजं हक्कयाम्बभूवोच्चैः ॥ सोपि ततस्तां त्यक्त्वा, दधाव तं प्रति
रुषा परुषः ॥ ३४४ ॥ [युग्मम्] प्राक्षिपदथोत्तरीयं, तस्य पुरो ब्रह्मनन्दनस्तं च ॥ तत्र प्रहर्तुमवनत-मारोहद्दन्तदत्ताङ्घ्रिः ॥३४५॥
वचनकशाङ्कुशकैर-स्तं च वशीकृत्य हस्तिनं सद्यः ॥ स्तम्भे बबन्ध नीत्वा, कृतस्तुतिर्जयजयेति जनैः ॥ ३४६ ॥ तत्रागतोथ भूप-
स्तं तत्तेजश्च वीक्ष्य विस्मितवान् ॥ कोयं स्कन्दो रविरुत, हरिः शशी वेति चापृच्छत् ? ॥ ३४७ ॥ तद्वृत्तेथ पितृव्येन, रत्नवत्या
निवेदिते नृपतिः ॥ सोत्सवमष्टौ स्वसुता, दिक्श्रिय इव दत्तवांस्तस्मै ॥ ३४८ ॥ ताः परिणीय मुहूर्ते, शुभेऽवसत्तत्र भूपभूः सुसु-
खम् ॥ तं चान्येद्युर्जरती, समेत्य काचिज्जगादैवम् ॥ ३४९ ॥ वैश्रवणाख्यो वैश्रवण-देश्यसम्पत्पुरेत्र वसतीभ्यः ॥ वार्द्धेः श्रीरिव
तस्य, श्रीमत्याह्वास्ति वरतनया ॥ ३५० ॥ सा च यदा मत्तेभा-दमोचि भवता तदा समीक्ष्य त्वाम् ॥ चित्रलिखितेव हृष्ट-दुःखि-
खितेवाभूत्त्वदेकमनाः ॥ ३५१ ॥ कथमपि च परिजनेना-नीता सद्मनि न भोजनं कुरुते ॥ न स्वपिति न च क्रीडति, पश्यति च
त्वन्मयं विश्वम् ॥ ३५२ ॥ पृष्टाथ मया धात्र्या, सा प्रोचे येन रक्षितास्मि गजात् ॥ स हि नरमणिर्न रमणो, यदि मे स्यात्तदा
मरणम् ॥ ३५३ ॥ तद् ज्ञापितोथ तस्या-स्तातो मां प्राहिणोत्तव समीपे ॥ तदरक्षि यथा व्याला-द्रक्ष तथा मन्मथादपि ताम् ॥३५४॥

१ कोलाहलः २ करी । ३ वक्षोजः स्तनः । ४ इलायाम् । ५ अङ्घ्रिः पादः ६ निद्रा । ७ भर्ता । ८ मदनात् ।

तामपि ततः कुमारः, परिणिन्ये सोत्सवं शुभे दिवसे ॥ वरधनुरपि नन्दाख्या-मुदुवाह सुबुद्धिसचिवसुताम् ॥ २५५ ॥ अथ तौ तत्र वसन्तौ, प्रथितौ पृथ्व्यां गुणैरजायेताम् ॥ वाणारसीं प्रति ततः, सोत्साहौ प्रस्थितौ च ॥ २५६ ॥ आयान्तं ब्रह्मसुतं, ज्ञात्वा वाणारसीपतिः कटकः ॥ अभ्येत्य सोत्सवं निज-गृहमनयद्ब्रह्मराजमिव ॥ २५७ ॥ निजतनयां कटकवतीं, चतुरङ्गं 'कटक-मुत्कटं कटकः ॥ प्रकटं विसङ्कटमदा-द्धनं च तस्मै मुदितचेताः ॥ २५८ ॥ अथ तद्धूताहूता, धनुसचिव-कणेरुदत्त-चम्पेशाः ॥ भगदत्त-चन्द्रसिंहा-दयः परेऽप्याययुर्भूपाः ॥ २५९ ॥ वरधनुमथ सेनान्यं, कृत्वा तैः परिवृतो नृपैर्नृपभूः ॥ प्रति काम्पील्यं प्रस्थित, दीर्घं दीर्घायने नेतुम् ॥ २६० ॥ दीर्घप्रहितो दूतो-ऽथागत्यैवं जगाद कटकादीन् ॥ दीर्घेण समं सख्यं, त्यक्तुं युक्तं न वः प्राच्यम् ॥ २६१ ॥ ते प्रोचुर्ब्रह्मसुताः, पञ्च वयस्याः पुरा भवाम वयम् ॥ ब्रह्मणि तु गते स्वर्गं, मैत्रीं प्राग् दीर्घ एव जहौ ॥ २६२ ॥ यद्ब्रह्मणोऽपि पुत्रे, राज्ये च न्यासमर्पिते दीर्घः ॥ चिरमकृत कर्म वैशस-मनुतिष्ठति नान्त्यजोऽपि हि तत् ! ॥ २६३ ॥ तद्गत्वा वद दीर्घं, यदेत्यसौ ब्रह्मसूस्ततो नश्य ॥ यदि वा भवाजिसज्जो, दूतं प्रोच्येति ते व्यसृजन् ॥ २६४ ॥ काम्पील्यमथ प्राप्य, ब्रह्मसुतोऽनवरतप्रयाणैर्द्राग् ॥ सैन्यै रुरोध परितो, नीरैर्नीरधिरिव द्वीपम् ॥ २६५ ॥ चुलनी तदा विरक्ता, गत्वा पूर्णाप्रवर्तिनीपार्श्वे ॥ प्रव्रज्य तपस्विनी, विधाय निर्वृतिमगात्क्रमतः ॥ २६६ ॥ दीर्घोऽपि पुरान्निरगा-द्रणार्थमवलम्ब्य साहसं सबलः ॥ युद्धं ततः प्रवृत्तं, परस्परं सैन्ययोरुभयोः ॥ २६७ ॥ भग्नमथ ब्रह्मभुवो, बलेन निजबलमुदीक्ष्य दीर्घनृपः ॥ योद्धु-

---

१ सैन्यम् । २ विशिष्टः सङ्कटो यस्मात् जेनाथी मोटुं संकट-भय थाय इति भा० । ३ मारीनाखवामाटे इति भा० । ४ क्रूरम् । ५ चाण्डा-लः । ६ सङ्ग्रामसज्जः ।

महौकत गर्जन्, घन इव मुञ्चन् शरासारम् ॥ २६८ ॥ तं च प्रेक्ष्य कुमारः, स्वयमागाद् योद्धुमुद्धुषितरोषः, ॥ प्राज्यबलौ सौ च मिथः, शस्त्रैः शस्त्राणि चिच्छिदतुः ॥ २६९ ॥ चक्रमुत्तस्थाथ करे, तदाययौ चक्रमर्क इव नभसः ॥ स तु तेन द्रुमफलमिव, दीर्घशिरोऽपातयत् पृथिव्याम् ॥ २७० ॥ जयतादयमुदयदयो, द्वादशचक्रीति वादिनो देवाः ॥ तच्छिरसि कुसुमवृष्टिं, तदा व्यधुः समवसरण इव ॥ २७१ ॥ पौरैः पितेव दृष्टो, बन्दिभिरिव जयजयेति वचनपरैः ॥ सोऽथ प्रविशच्चक्री, काम्पील्यं त्रिदिवमिव मघवा ॥ २७२ ॥ नृपतिः प्राक् परिणीताः, पत्नीरानाययत्ततः सकलाः ॥ भरतक्षेत्रं चाखिल-मसाधयत्प्रबलबलकलितः ॥ २७३ ॥ तस्याथ नृपैर्निखिलै-रभिषेको द्वादशाब्दिको विदधे ॥ सोऽथागमयत्समयं, मर्मयमिव समं सुखं विलसन् ॥२७४॥ अन्येद्युर्वरगीतं, सङ्गीतं तस्य पश्यतः शस्यम् ॥ कृतचित्रपुष्पचित्रं, ददौ कुसुमकन्दुकं दासी ॥ २७५ ॥ तं प्रेक्ष्य चक्रवर्ती, दृष्टः क्वापीदृशो मयेत्यन्तः ॥ कुर्वन्नूहं स्मृत्वा, पञ्चभवान्मूर्च्छितो न्यपतत् ॥ २७६ ॥ सम्भ्रान्तैः सामन्तैः, सिक्तश्चन्दनरसैर्गतः स्वास्थ्यम् ॥ सौधर्मेऽद्राक्षमहं, कन्दुकमीदृशमिति स बुबुधे ॥ २७७ ॥ पूर्वभवभ्राता मे, कथमथ मिलतीति चिन्तयंश्चक्री ॥ तं ज्ञातुमसं चक्रे, सार्धश्लोकं शुचिश्लोकः ॥ २७८ ॥ "तथाहि—('दासा दसण्णे आसी, मिआ कालिंजरे नगे ॥ हंसा मयंगतीराए, सोवागा कासिभूमीए ॥ १ ॥ देवा य देवलोगंमि, आसि अम्हे महिड्ढिआ') पूरयति यो द्वितीयं, श्लोकं तस्मै ददामि राज्यार्धम् ॥ इति चाघोषयद्बुधैः, पुरेऽखिले प्रतिदिनं चक्री ॥ २७९ ॥ राज्यार्थी चक्रे तं, श्लोकं सार्धं जनोऽखिलः कण्ठे ॥ पूरितवान्न तु कश्चि—द्विपश्चिदपि पश्चिमश्लोकम् ॥ २८० ॥ इतश्च—जीवश्चित्रस्य महेभ्य-नन्दनः पुरिमतालसञ्ज्ञपुरे ॥ जातिस्मरणाद् ज्ञात्वा, पूर्वभवा-

---

१ बाणवृष्टिम् । २ इन्द्रः । ३ कालम् । ४ निर्विभाज्यकालविशेषम् । ५ विद्वान् ।

नाददे दीक्षाम् ॥ ३८१ ॥ ग्रामादिषु विहरंस्तं, सदलं श्लोकं निशम्य लोकेभ्यः ॥ प्राग्भवबान्धवबोधन-कृते स काम्पील्यनगरमगात् ॥ ३८२ ॥ तत्रारामे नाम्ना, मनोरमे संस्थितः स साधुस्तम् ॥ सार्धं श्लोकं श्रुत्वा-रघट्टिकमुखाददोऽवादीत् ॥ ३८३ ॥ ["इमा णो छड्डिआ जाई, अन्नमन्नेण जा विणा"] इति तेनोक्तमधीत्या-रघट्टिकः श्लोकपश्चिमदलं तत् ॥ गत्वा सपदि नृपाग्रे, श्लोकयुगलमब्रवीत् सकलम् ॥ ३८४ ॥ स्नेहावेशान्मूर्च्छां, गतस्ततोऽपतदिलापतिरिलायाम् ॥ तत्र प्रेक्ष्यानभ्रा-ऽशनिपातमिवाक्षुभत् परिषत् ॥ ३८५ ॥ जातेदृशी दशा नः, प्रभोर्गिरास्येति परिजनः कोपात् ॥ तमथार-घट्टिकं मुहु-रताडयत् पार्ष्णिघाताद्यैः ॥ ३८६ ॥ न मयायमपूरि ततो, मा मां ताडयत यूयमिति विलपन् ॥ मुक्तः स कोऽस्य पूरक, इति पृष्टश्चाब्रवीदेवम् ॥ ३८७ ॥ श्लोकमपूरयदर्धं, मुनिर्मदरघट्टनिकटभूमिष्ठः ॥ शापमहं तु व्यसनं, मुधैव राज्यस्पृहाग्रहीलः ॥ ३८८ ॥ अथ चन्दनरसपूरैः, संसिक्तो व्यक्तचेतनश्चक्री ॥ विज्ञातमुनिरागम-श्रुतः स्नेहोल्लसच्चित्तः ॥ ३८९ ॥ दत्त्वारघट्टिकाय, द्युम्नं बहु पारितोषिकं सद्यः ॥ सान्तःपुरपरिवारः, सोत्कण्ठोऽगात्तदुद्यानम् ॥ ३९० ॥ [युग्मम्] नत्वा च तं मुनिवरं, बाष्पजलाप्लुतविलोचनश्चक्री ॥ निषसाद यथास्थानं, प्राच्यस्नेहाधिकस्नेहः ॥ ३९१ ॥ मुनिनाऽप्यारब्धा धर्मदेशना-दर्शिता भवनिर्गुणता, वर्णिताः कर्मबन्धहेतवः, श्लाघितो मोक्षमार्गः, ख्यापितः शिवसौख्यातिशयः । ततः संविग्ना परिषत्, न भावितो ब्रह्मदत्तः । प्राह च-यथा स्वसङ्गमसुखेनाऽऽह्लादिता वयं तथाऽऽह्लादयतु भवान् राज्यस्वीकरणेन, पश्चात् तपः सममेव करिष्यावः, एतदेव वा तपसः फलम् । मुनिराह-युक्तमिदं भवतामुपकारोद्यतानाम्, केवलं दुर्लभेयं मानुष्यावस्था, सततं यातुकमायुः, चञ्चला श्रीः, अनवस्थिता धर्मबुद्धिः, विपाककटवो विषयाः, तदा-

१ भूकान्तः । २ पृथ्व्याम् ।

सत्त्वानां ध्रुवो नरकपातः, दुर्लभं पुनर्मोक्षबीजम्, विशेषतो विरतिरत्नम्, न नश्यामाद् दुस्तरनरकपातहेतुककतिपयदिन-भाविराज्या-श्रयमाह्लादयति चित्तं विदुषाम्। ततः परित्यज्य कदाशयं, स्मर प्राग्भवानुभूतदुःखानि, पिब जिनवचनामृतरसम्, सञ्चर तदुक्त-मार्गेण, सफलीकुरु मनुजजन्मेति। स प्राह-भगवन्! उपनतसुखत्यागेन अदृष्टसुखवाञ्छा अज्ञानितालक्षणम्, तन्मैवमादिश, कुरु मत्समीहितम्। ततः पुनरुक्तमुक्तोऽपि यदा न प्रतिबुध्यते तदा चिन्तितं मुनिना-आः! ज्ञातं पूर्वभवे सनत्कुमारचक्रिस्त्रीरत्ना-लकसंस्पर्शनवेदनाद् जाताभिलाषातिरेकेण मया निवार्यमाणेनापि कृतं तत्प्राप्त्यर्थं स्वकभूतेन सता निदानम्, तदिदं विजृम्भते। अतः कालदष्टवदसाध्योऽयं जिनवचनमन्त्रतन्त्राणामिति।

तमबोध्यतमं हित्वा, सद्वैद्य इवापदुं निकटमरणम्॥ विजहार यतिर्भूमी-पतिरपि राज्यं चिरं बुभुजे ॥ ३९२ ॥ तं चान्यदा द्विजः पूर्व-संस्तुतोऽभ्येत्य कोऽप्यदोवादीत ॥ भुङ्क्षे यदात्मना त-त्प्रदेहि मे भोजनं चाक्रिन्! ॥ ३९३ ॥ ऊचे नृपो मदन्नं, दुर्जर-मन्यस्य सृजति चोन्मादम्॥ विप्रो जगाद धिक् त्वां, कदर्यमन्नप्रदानेपि ॥ ३९४ ॥ सकुटुम्बमथ नरेन्द्र-स्तं निजभोजनमभोजय-त्कोपात्॥ अथ तस्याविरभून्निशि, मदनोन्मादो भृशं तस्मात्॥ ३९५ ॥ अनपेक्षितनिजजननी-जामिजनीव्यतिकरस्ततो विप्रः॥ ससुतोपि प्रावर्त्तत, रते सुरामत्त इव विकलः॥ ३९६ ॥ प्रातस्तु लज्जया स, द्विजो गृहजनश्च तस्य नान्योन्यम्॥ दर्शयितुमास्यम-शकन्, मशकपटलमलिनमवसादात्॥ ३९७ ॥ अनिमित्तार्रातिर्मां, सकुटुम्बमहीलयन्महीशोऽसौ॥ इति चिन्तयन्नमर्षी-नगरा-न्निरगाच्चतो विप्रः॥ ३९८ ॥ तेन भ्रमताथ बहिः, पशुपालोऽदर्शि दर्शिताश्चर्यः॥ कर्करिकाभिः पिप्पल-दलपटलं छिद्रयन् दूरात्

१ कृपणम्। २ जामिः भगिनी। ३ जनी पुत्री। ४ मदिरया मदोन्मत्तः। ५ मुखम्। ६ कज्जलसमूहमलिनम्। ७ खेदात्। ८ शत्रुः।

॥ ३९९ ॥ मत्कार्यं कर्तुमसौ, क्षम इति निश्चित्य चाटुवैः स ततः ॥ इत्यूचे तं सन्मान-दानवचनैर्वशीकृत्य ॥ ४०० ॥ राजपथे यो द्विरदे, स्थितः सितछत्रचामरो व्रजति ॥ प्रक्षिप्य गोलिके त्वं, तस्य दृशौ स्फोटयेः क्षिप्रम् ॥ ४०१ ॥ तत्प्रतिपद्य जडत्वात्, स्थित्वा कुड्यान्तरे दृशौ नृपतेः ॥ सह मुक्तगोलिकाभ्यां, सोपि समं स्फोटयामास ॥ ४०२ ॥ पशुवत्पशुपालः सोथ, हन्यमानोऽक्षरक्षकैः कृत्वा ॥ राज्ञेऽपकारिणं तं, द्विजमाख्यत्कुमतिदानरिपुम् ॥ ४०३ ॥ तदवेत्य नृपः कुपित-स्तं विप्रं पुत्रमित्रबन्धुयुतम् ॥ व्यापादितवान् सद्यः, कोपो महतां हि नो विफलः ॥ ४०४ ॥ अपरान् पुरोहितादी-नपि निखिलान्नगरवासिनो विप्रान् ॥ सोऽघातयन्नृशंस क नु, रोषान्धानां विवेकमतिः ? ॥ ४०५ ॥ सचिवं चैवमवोचत, भृत्वा स्थालं द्विजन्मनां नयनैः ॥ स्थापय मम पुरतोऽन्वह-महं यथा तानि मृद्नामि ॥ ४०६ ॥ राज्ञस्तस्य तमाशय-मवेत्य सचिवोपि शुभमतिः क्रूरम् ॥ आपूर्य श्लेष्मातकं-फलैः पुरोऽस्थापय-त्स्थालम् ॥ ४०७ ॥ तदथ स्थालं नृपतिः, परपर्श मुहुर्मुहुः स्वपाणिभ्याम् ॥ रमणीरत्नस्पर्शा-दपि तत्स्पर्शेऽधिकं मुमुदे ॥ ४०८ ॥ द्विजनेत्रधिया तानि च, फलानि निर्दयममर्दयन्मुदितः ॥ न च तत्स्थालं पुरतो-ऽपासारयदनिशमपलज्जः ॥ ४०९ ॥ इत्थं प्रवर्द्धमाना-ऽशुभपरिणामो दिनं दिनं प्रति सः ॥ अतिगमयति स्म षोडश, वर्षाण्यविरतविषयतर्षः ॥ ४१० ॥ सर्वायुषाथ नृपतिः शरदां शतानि, सप्तातिवाह्य विषयामिषलोलुपात्मा ॥ उत्कृष्टजीवितमुपार्ज्य तमस्तमायां, रौद्राशयादजनि नैरयिकः क्षमायाम् ॥ ४११ ॥ चित्रोपि कामैर्विरक्तचित्तः, उदात्तचारित्रतपः प्रपाल्य ॥ भावविशुद्धं संयमं चरित्वा, परमां गतिं भजते स्म निश्चलाम् ॥ ४१२ ॥

---

१ विप्रः । २ गजे । ३ गोपः । ४ विप्राणाम् । ५ श्लेष्मातकतरुफलैः । ६ क्षीरकरस्पर्शात् । ७ अनष्टविषयेच्छः । ८ वर्षाणाम् ९ भूमौ ।

॥ श्री विनय-भक्ति-सुन्दर-चरणग्रन्थमालातो मुद्रितानि ग्रन्थरत्नानि ॥

१	श्री प्रत्येकबुद्धचरित्रम्	०-१०-०
२	श्री ग्रंथमालिका भाषान्तर	भेट
३	श्री ध्यानशतकम् [टीका-श्री हरिभद्रसूरि] [श्री जीनभद्रगणिक्षमाश्रमणविरचितम्]	१-०-०
४	श्री नूरदेवनृपचरित्रम्	०-५-०
५	श्री बावीश परीषह कथा	१-०-०
६	श्री भगदत्तचरित्रम्	०-६-०
७	श्री चित्रसम्भूतचरित्रम्	०-७-६
८	श्री शान्तिनाथचरित्रम्	प्रेसमां
९	श्री विष्णुकुमारचरित्रम्	"
१०	श्री उदयनराजर्षिचरित्रम्	"
११	श्री सनत्कुमारचरित्रम्	"
१२	श्री दशार्णभद्रचरित्रम्	"
१३	श्री उत्तराध्ययन सूत्रम्	१३-०-०
	[श्री भाव विजयोपाध्यायवृत्तियुतम्]	"
१४	श्री हैमधातु पारायणम्	"
१५	श्री श्राद्धप्रतिक्रमणसूत्रं वृत्ति द्वयोपेतम्	प्रेसमां
१६	श्री आर्यरक्षित चरित्रम् संस्कृत भाषान्तरसहितम्	"
१७	श्री साधुप्रतिक्रमण सूत्र वृत्ति	छपायमां
१८	उणादि नाममाला कोश (श्री शुभशीलगणी विरचित अनेक अप्रसिद्ध शब्दोना संग्रह युक्त)	"
१९	श्री धर्मोपदेशमाला सटिका	"

प्राप्ति स्थान—पं. मुरालाल कालीदास

ठे० श्रीसरस्वती जैन पुस्तक भंडार १४५ गुलालवाडी-मुंबई

पंडित हीरालाल हंसराज-जामनगर.

श्रीविनय

महा महोपाध्याय श्रीमद्भावविजयजी गणिवर विरचितम्

श्री चित्रसम्भूतचरित्रं समाप्तम् ॥

सुन्दर